श्रीमदभिनवविद्यातीर्थनिधिना प्रकाशिता

विद्यारण्यकथातरङ्गिणी

—: कविः :—

उभयभाषाविद्वान् - ह. वे. नारायणशास्त्री

मौल्यम् — पञ्चरूप्यकाणि

॥ श्री ॥

श्रीमदभिनवविद्यातीर्थनिधिना प्रकाशिता

विद्यारण्यकथातरङ्गिणी

—: कविः :—

उभयभाषाविद्वान् - ह. वे. नारायणशास्त्री

मौल्यम्— पञ्चरूप्यकाणि

कविः

विद्वान् नारायणशास्त्री

596, 5th Block Rajajinagar

Bangalore - 560010

मुद्रकः

सुधामुद्रणमन्दिरम्,

उत्तरादिमठ कंपौंड, बसवनगुडी,

बेंगळूरु – ५६०००४.

शृङ्गगिरि जगद्गुरु श्रीमदभिनवविद्यातीर्थमहास्वामिनां

अनुग्रहसन्देशः

श्री श्री जगद्गुरु शङ्कराचार्य महासंस्थानम् शारदापीठम् , शृङ्गेरी

Private Secretary
To His Holiness Sri Jagadguru
Shankaracharya Dakshinamnaya
Sri Sharada Peetham
Sringeri 577139 (Karnataka) Camp शृङ्गेरी

Date २२।५।१९८१

विद्वत्सु श्री. ह. वे. नारायणशास्त्रिषु सादरा विज्ञप्तिः ।

भवदीयं "विद्यारण्यकथातरङ्गिणी" नामकं ग्रन्थं श्रीचरणेषु समार्पयम् । परमहंसयमिचक्रवर्तिनः सुगृहीतनामधेयान् श्री. विद्यारण्य-स्वामिनः कस्को न जानाति सचेताः । ते खलु वैदिकमतविध्वंसकै-राक्रान्तमिमं देशं तेभ्यः परिरक्ष्य कर्णाटकसाम्राज्यं प्रतिष्ठाप्य वैदिकाध्वानं निष्कण्टकं व्यतानिषुः । सीमातिशायिपांडितीसमुल्लसितास्ते महानुभावाः नैकान् ग्रन्थानरीरचन् विशेषतोऽद्वैतदर्शने । वस्तुतस्तादृशं दर्शनमेव नास्ति यत्र तैर्लेखनी न व्यापारिता । ते अत्र शृङ्गगिरावेव स्वीकृत-पारमहंस्याः अस्मिन्नेव पीठे अभिषिक्ता व्यराजन्तेत्यप्यतिरोहितमेव विदुषाम् ।

तत्तादृशां महामहिमभूम्नां विद्यारण्यस्वामिनां पवित्रं चरित्रं भवन्तः गीर्वाणभाषया पद्यरूपेण विरचय्य कृतार्थाः बभूवुः । ग्रन्थमिमं श्रीचरणा अवालोकयन् । शैली नितरां हृद्या । क्लिष्टपदप्रयोगाभावेन सर्वेषां सुलभावबोधो भविष्यति ।

काव्यमिदं सर्वत्र प्रसरतु, एतत्काव्यप्रणेतारः भवन्तः श्रेयांसि भूयांसि समश्नुवीरन् , एतदधीत्य सर्वेऽपि लोकाः आनन्दातिशयमनुभवन्त्विति च श्रीचरणा आशासते।

इति निवेदयिता

सि. वि. गिरिधरशास्त्री


Private Secretary to His Holiness
Sri Jagadguru Shankaracharya
Sri Sharada Peetham Sringeri
577139 (Karnataka)

॥ श्री ॥

समर्पणम्



श्री श्री जगद्गुरु
अभिनवविद्यातीर्थदेशिकेन्द्राः



श्री श्री जगद्गुरु
भारतीतीर्थस्वामिपादाः

श्रीमत्परमहंसेत्यादि बिरुदाङ्कित श्रीशृङ्गेरी महासंस्थानाधीश्वर
जगद्गुरु श्री चन्द्रशेखरमहादेशिकेन्द्रकरकमलसञ्जात
व्याख्यानसिंहासनाधीश्वर
जगद्गुरु श्री अभिनवविद्यातीर्थमहास्वामिनां
तथा तत्करकमलसञ्जात
जगद्गुरु श्री भारतीतीर्थमहास्वामिनां
च सन्निधाने साष्टाङ्गप्रणतिपूर्वकं काव्यमिदमुपहारीकृतम् ।

— जगद्गुरु महास्वामिनां शिष्यकोटिप्रविष्टः
ह. वे. नारायणशास्त्री

काव्यमिदं सर्वत्र प्रसरतु, एतत्काव्यप्रणेतारः भवन्तः श्रेयां भूयांसि समश्नुवीरन् , एतदधीत्य सर्वेऽपि लोकाः आनन्दातिशयमनु भवन्त्विति च श्रीचरणा आशासते।


इति निवेदयिता

सि. वि. गिरिधरशास्त्री

Private Secretary to His Holiness
Sri Jagadguru Shankaracharya
Sri Sharada Peetham Sringeri
577139 (Karnataka)

॥ श्री ॥

समर्पणम्

श्री श्री जगद्गुरु
अभिनवविद्यातीर्थदेशिकेन्द्राः

श्री श्री जगद्गुरु
भारतीतीर्थस्वामिपादाः

श्रीमत्परमहंसेत्यादि बिरुदाङ्कित श्रीशृङ्गेरी महासंस्थानाधीश्वर
जगद्गुरु श्री चन्द्रशेखरमहादेशिकेन्द्रकरकमलसञ्जात
व्याख्यानसिंहासनाधीश्वर
जगद्गुरु श्री अभिनवविद्यातीर्थमहास्वामिनां
तथा तत्करकमलसञ्जात
जगद्गुरु श्री भारतीतीर्थमहास्वामिनां
च सन्निधाने साष्टाङ्गप्रणतिपूर्वकं काव्यमिदमुपहारीकृतम् ।

– जगद्गुरु महास्वामिनां शिष्यकोटिप्रविष्टः
ह. वे. नारायणशास्त्री

विज्ञप्तिः

महदिदं प्रमोदस्थानं यदिदमैतिहासिकवस्तुविभूषितं "विद्यारण्यकथातरङ्गिणी" नाम नवीनं काव्यमिदानीमुपहारीक्रियते गीर्वाणवाणीप्रणयिनां सहृदयानां चरणारविन्दयोः । काव्यस्यास्य नायकः पूर्वाश्रमे माधव इति प्रसिद्धस्तत्र भवान् विद्यारण्ययतीन्द्रः दक्षिणभारते कर्णाटदेशे क्रिस्तीयचतुर्दशशतमाने रूढमूलस्य विजयनगरसाम्राज्यस्य संस्थापक इति सुविदितमेव सर्वेषामितिहासविदाम् । यदा म्लेञ्छा आर्यावर्ताक्रमणानन्तरं दक्षिणापथमाक्रम्य सनातनहिन्दूधर्ममुन्मूलयितुं प्रवृत्ताः तदा विजयनगरसाम्राज्यमाविर्भूय तत्प्राबल्यनिवारणपूर्वकं हिन्दूधर्ममुज्जीवयामासेत्येतदपि नाऽविदितं भारतीयानाम् ।

श्रीविद्यारण्ययतीशानः न केवलं राजनीतिकौशल्येन लब्धसमज्यः किंत्वनितरसाधारणेन पांडित्येनापि परां कोटिमारूढोऽस्य महिमातिशयः । अनेन विरचिताश्चतुर्वेदभाष्याणि, पराशरस्मृतिभाष्यं, जैमिनीयन्यायमालाविस्तरः, सर्वदर्शनसंग्रहः, अनुभूतिप्रकाशः, दशोपनिषद्दीपिका, ब्रह्मगीता, पंचदशी, जीवन्मुक्तिविवेकः अपरोक्षानुभूतिटीका, माधववृत्तिः इत्याद्या बहवो ग्रंथाः सुरगवीं सुपरिपुष्टां कुर्वन्ति ।

श्रीविद्यारण्ययतीन्द्रः शालिवाहनशकस्य त्रयोदशशतमाने प्रादुर्बभूव । "नागेष्वर्के नियमितशके शालिवाहस्ययाते . . . सप्तम्यां

श्रीविजयनगरं निर्ममेन्द्रः ” (तरङ्गः १३ श्लो. १०) इति शासनवचनेन शा. शा. १२५८ क्रि. श. १३३६ तमे वर्षे विजयनगरं राजधानीं निर्मापयामासेत्यवगम्यते । एवं कर्णाटसाम्राज्यं संस्थाप्य कंचित्कालं मंत्रिपदे स्थित्वा विद्यानगरीं निर्माय धर्मसंस्थापनोद्देशं सम्यक् साधयित्वा कृतकृत्यः शृङ्गगिरीमागत्य भगवतः शंकराचार्यस्य दक्षिणाम्नायपीठमलङ्कुर्वन् षड्विंशो जगद्गुरुरिति प्रतीतः चिरं विरराज ।

महापुरुषस्यास्य जन्मकालजीवितकालसाहसचरितादिविषये बहवो मतभेदा इतिहासकारेषु दरीदृश्यन्ते । मया तु कर्णाटदेशे सर्वत्रा विसृत्वरमतिमानुषचरितं इतिवृत्तेन बहुपण्डितसंमतेन सह योजयित्वा काव्यवस्तु कल्पितम् । एतादृशमहाप्रभावशालिनः शिवांशसंभूतस्य महोदारचरितमुपवर्णयितुं प्रवृत्ता मदीया वाणी धन्यधन्यतमा सञ्जाता इति महानात्मनि मे बहुमानः । कृतिमिमामामूलचूडं परिशील्य समुचितनिर्देशनप्रदानेन उपकृतवतां मम वेदान्तगुरूणां सुगृहीतनामधेयानां पंडितप्रवरेत्यादिबिरुदभूषितानां (संप्रति देवभूयं गतानां) वी. एस्. रामचंद्रशास्त्रिमहोदयानां महोपकारमनवरतं स्मरामि ।

यदा मया श्रीविद्यारण्ययतीन्द्रमधिकृत्य काव्यमेकं विरचितमिति निवेदितं तदनुपदमेव “ अविलम्बितमानीयतामि”ति प्रसन्नगम्भीरया वाण्या मामुद्दिश्य सुष्टु काव्यं परिशील्य “ समीचीना कृतिः ” “शारदानुग्रहस्य बाढं पात्रमसी”त्यादिवचनामृतानुसारेण मामभिवर्ष्य

कृपावलोकनेन परमानुग्रहं कृतवतां शिवांशसंभूतानामनितरसाधारण-महिमाञ्चितानां शृङ्गगिरिशारदामहापीठपरमजगद्गुरूणां संप्रति ब्रह्मी-भूतानां श्री चंद्रशेखरभारतीमहास्वामिनां चरणारविन्दं विनयोपपन्नः संस्मरामि ।

किंच मदीयां विनयोपपन्नां विज्ञापनां पुरस्कृत्य करुणया काव्यमिदमामूलचूडं परिशील्य काव्यवस्तुनि पदप्रयोगेषु च समुचित-विन्यासमादिष्टवतां श्रीशृङ्गगिरिजगद्गुरु श्रीमदभिनवविद्यातीर्थदेशिकेंद्र-करकमलसंजात जगद्गुरु श्रीभारतीतीर्थमहास्वामीनां परमानुग्रहं अनवरतमाकलयामि ।

मन्दविभवेन कथमेतन्मुद्राप्य संस्कृतप्रणयिभ्यः समर्पणीयमिति चिन्तातपतप्तेन मया दिष्ट्या मध्यमलोकजङ्गमकल्पतरुच्छाया समासादिता । श्रीशृङ्गगिरिदक्षिणाम्नायपीठाधीश्वराः जगद्गुरुसार्वभौम श्रीमदभिनवविद्यातीर्थमहास्वामिनः काव्यस्यास्य मुद्रापनकार्यनिर्वहणौ-दार्येण मामनुगृहीतवन्तः । तत्र भवतामुपकारभूमानमनवरतं साष्टाङ्ग-प्रणतिपूर्वकमनुस्मरामि ।

कृतेरस्या मातृकाविलेखनमुद्रणपत्र (Proof) परिशोधनादि-बहुविधसाह्येन प्रकाशनकार्ये बहुधायासितात्मनः शृङ्गेरिसद्विद्यासंजीविनि पाठशालाया भूतपूर्वविद्यार्थिनः तथा मम प्रियछात्रस्य विदुषः कोप्प नारायणभट्टस्योपकृतेः प्रत्युपकृतित्वेन किमहं दातुं समर्थः अंतरा आशीर्वादान् ।

येषां संततप्रयत्नेन काव्यमिदं सुन्दरपुस्तकरूपेण संस्कृतभाषाभिमानिनां लोचनातिथीकृतं तेषां सुधामुद्रणमन्दिराधिपतीनां श्री वरखेडकर धनंजयाचार्यमहोदयानां महोपकारोऽनवरतं स्मरणीयः ।

गीर्वाणभाषाभिमानेन महापुरुषचरितगौरवेण च सहृदयाः काव्यमिदं पुरस्कुर्वन्त्विति आवेदयिता

—विद्वान् नारायणशास्त्री ।

कथासारः

क्रि. श. चतुर्दशशतमाने दक्षिणभारते विशेषतः कर्णाटदेशे महान्विप्लवः समभवत् । बल्लाळस्वराज्यपतनानन्तरं प्रबलराष्ट्रस्याभावान्माण्डलिकाः स्वतंत्राः परस्परं कलहायमाणा आसन् । तदानीं म्लेञ्छा राष्ट्रमाक्रम्य देवागारभञ्जन–नारीमानभङ्ग–जातिभ्रंशकरणादिक्रूराचार-प्रवृत्ता देशे सर्वत्र क्षोभमुत्पादयामासुः । तदा देशकल्याणाय श्रीविद्यारण्यमुनीन्द्रस्य जन्म संपन्नम् ।

आसीत्कर्णाटदेशे तुंगभद्रानदीतटे पंपाभिधाना नगरी । तत्र मायणो नाम भूसुरोत्तमो वसति स्म । तस्य धर्मपत्नी पतिव्रताग्रगण्या श्रीमती नामधेया सुदती । तस्या गर्भसुधांबुराशौ माधवसायण–भोगिनाथनामानः त्रयः पुत्राः समभवन् । ते च पुत्रा निरतिशयबुद्धिसंपन्नाः पित्रा सम्यगध्यापिताः । तेषु ज्येष्ठो माधवः सर्वातिशायिगुणसंपन्नो लोकोत्तरप्रतिभाविशेषेण सर्वेषां प्रशंसापात्रमासीत् ।

पितुः सकाशादधिगतसकलविद्यो माधवः शृङ्गगिरिं गत्वा दिगंतविश्रांतयशसः श्रीविद्यातीर्थयतींद्रस्य सन्निधाने निगमांतविद्यामधीतवान् । परिसमाप्तविद्यं माधवम् गुरुः चोदयामास यत् दक्षिणभारते म्लेञ्छनिपीडितस्य सनातनधर्मस्य संरक्षणे महान्प्रयत्नः कर्तव्यः इति ।

गुरुकुलान्निवृत्तो माधवः पुत्रविवाहप्रवृत्तं पितरं कथमपि निवार्य जगद्धितार्थं जगन्मातुर्भुवनेश्वर्या अनुग्रहं लब्धुं कठोरं तपश्चचार ।

तपसा परितुष्टा जगदीश्वरी कृतसंन्यासस्वीकरणसंकल्पस्य माधवस्य धर्मोद्धरणकार्यसफलीकरणायापेक्षितकाले राजधानीं सुवर्णवृष्ट्या पूरयामिति वरं ददौ । ततो माधवः शृङ्गगिरीमासाद्य तत्र श्रीविद्यातीर्थयतीश्वरादभिगततुरीयाश्रमः 'श्रीविद्यारण्य' इति नामांतरेण सुप्रसिद्धो बभूव ।

अथ कदाचिद्विद्यारण्ययतींद्रः शिष्यवृंदपरिवृतः कांपिल्यकनगरोपकंठस्थितसोमनाथदेवालये वसतिं चकार । तत्रांतरे म्लेञ्छसैन्यमेकं देवागारमुन्मूलयितुमाजगाम । तदानीं भयाभिभूतेष्वंतेवासिषु मृत्युंजयजपतत्परे गुरौ सायुधौ द्वौ युवानौ सहसा कुतश्चिदुपेत्य देवागारनिर्मूलनव्यग्रमरिसैन्यमाक्रम्य म्लेञ्छयोधानां शिरांसि कृपाणेन कर्तयितुं प्रवृत्तौ । संजाते तुमुले हतावशिष्टाः सैनिकाः कांदिशीका बभूवुः । प्रहृष्टो यतींद्रो विदिततवृत्तांतः पादावनतौ यदुवंशसंभूतौ देवगिरिनृपालय संगमराजस्य पुत्रौ हक्कबुक्कनामानौ तौ शिष्यत्वेन परिजग्राह । तत्कालसमुचितां राजनीतिमुपदिश्य प्रस्तुतं करणीयं च निर्दिदेश । तदुपदेशं निर्देशं च शिरसा गृहीत्वा म्लेञ्छैरराजकतां गमितमानगोंदीनगरं प्रविश्य तैस्तैरुपायैः पौरमनांसि वशीकृत्य तन्नगरप्रभुत्वमासेदतुः । शत्रुभयेन काननान्तर्निलीनाः आनेगोंदीसैनिकाः प्रत्यागत्य राजकुमारयोर्नायकत्वमङ्गीचक्रुः । विद्यारण्ययतीश्वरस्तु देशे सर्वत्र संचार्य जनानामैकमत्यमुपदिश्य प्रसक्तविप्लवपरिहाराय प्रबलहिंदुसाम्राज्यसंस्थापनस्यावश्यकत्वं प्रतिपादितवान् । सर्वे पौरजानपदाः विद्यारण्य-

महोपदेशं शिरसाभ्यनंदन् । विद्यारण्यशासनेन कुमारो हक्को हरिहरोनाम्ना आनेगोंदीनगरस्य राजा बभूव । तदनुजो बुक्ककुमारो दिग्विजयार्थं गतः सर्वान्मांडलिकान् वशीचकार । विद्यारण्यमुनिः सचिवो भूत्वा दुर्गनिर्माणादिकार्येष्वाहितप्रयत्नो बभूव । म्लेच्छलुण्ठितदेशे दुर्गनिर्माणादिकार्यस्य कृते धनं कथं संपादनीयम् ? जनाश्च करदानेऽप्यसमर्था आसन् । एतस्मिन्व्यतिकरे कस्मिंश्चिद्भव्यदिवसे विद्यारण्यमहामुनेः प्रभावेण भगवती भुवनेश्वरी आनेगोंदीनगरे ववर्ष सुवर्णराशिम् । पौराश्च परमाद्भुतमिदं प्रत्यक्षीकृतवंतः विद्यारण्यमहामुनीं देवांशसंभूतं मेनिरे ।

यतीन्द्रेण संस्थापितसाम्राज्योचितराजधानीन्निर्माणकामेन तुङ्गभद्रातीरे सुविशाला विद्यानगरीति विजयनगरमिति च सुविश्रुता महानगरी काचन निर्मिता ।

शुभदिने सुमुहूर्ते वैजयन्तसदृशमहाप्रासादे हरिहरदेवः विद्यारण्यमहामुनेरनुग्रहेणाभिषिक्तः कर्णाटकचक्रवर्तिपदे विरराज । बुक्कदेवस्तु युवराजो बभूव । परितुष्टाः प्रजाश्च मुनीश्वरमस्तुवन् ।

कृतकृत्यो विद्यारण्यमहायतींद्रो राजकार्याद्विरतः शृङ्गगिरिक्षेत्रमागत्य तत्र जगद्गुरुपीठे विराजमानः सुचिरं ब्रह्मानुसंधाननिरतः परमानंदमनुबभूव ।

॥ श्रीगणेशाय नमः ॥

॥ श्रीशारदायै नमः ॥

नारायणकविविरचिता

विद्यारण्यकथातरङ्गिणी

प्रथमस्तरङ्गः

कथावतरणम्

शृङ्गाद्रिमध्यप्रविराजमानां
तुङ्गासरित्तीरविहारसक्ताम् ।
भङ्गातिगोत्तुङ्गमतिप्रदात्रीं
गङ्गाभवर्णां प्रणमामि वाणीम् ॥ १ ॥

निशम्य वाङ्मेघरवं यदीयं
नृत्यन्ति विद्वज्जनकेकिसङ्घाः ।
वेदान्तनीलाम्बुजपूर्णचन्द्रं
तं शङ्कराचार्यमहं प्रपद्ये ॥ २ ॥

---

१) गङ्गाभवर्णां= धवलवर्णां "या कुन्देन्दुतुषारहारधवला" इत्यादि-प्रमाणवाक्यैः शारदायाः धवलवर्णत्वमिति ज्ञेयम् ।

२) केकिसङ्घाः= मयूरसमूहाः "शिखावलः शिखी केकी" इत्यमरः ।

लक्षीकृताघविनिवारणबद्धकक्षः
मोहाभिभूतजगदुद्धरणैकदक्षः ।
जीयात्सुधाकरकलासुषुमावलक्षः
श्रीचंद्रशेखरयतीन्द्रकृपाकटाक्षः ॥ ३ ॥

शिवाय काले जगतां प्रवृत्ता
रसर्द्धिसंवारितलोकतापाः ।
अत्युन्नता जीवनहेतुभूता
घनोपमा भागवता जयन्ति ॥ ४ ॥

तदेव काव्यं सुजनादृतं स्यात्
संकीर्त्यते यत्र गुणो मनोज्ञः ।
क्षेत्रं यथा स्वादुफलाश्रयाणां
प्ररोहणस्थानमनोकहानाम् ॥ ५ ॥

---

३) सुषुमा= " सुषुमा परमा शोभेत्यमरः । "

४) भगवदंशसंभूताः महापुरुषाः सर्वोत्कर्षेण वर्तन्ते इति भावः । अत्र भगवदंशसंभूतानां मेघानां च उपमानोपमेयभावः । अस्मिन् काव्ये वर्णनीयो नायकः देवांशसंभूतो महापुरुषः इति काव्यार्थसूचना ।

५) "कवेरल्पापि वाग्वृत्तिः विद्वत्कर्णावतंसति । नायको यदि वर्ण्येत लोकोत्तरगुणोत्तरः" इति भोजराजवचनमनुसन्धेयम् ।

कवेस्तदा वाक्सफलत्वमीयात्
नेता महात्मा यदि वर्णितः स्यात्
प्रकृष्टसौभाग्यगुणाभिरामे
निबद्धरागा वरवर्णिनीव ॥ ६ ॥

शृङ्गाररसंवर्णनतत्पराणा-
मगात्स कालः कविपुङ्गवानाम् ।
आरामवाटे हुतभुक्परीते
कामोत्सवे कोऽभिरमेत तत्र ॥ ७ ॥

सा प्रौढकाव्यार्थविचारशक्तिः
हा हन्त ! नष्टा कुविधेर्बलेन ।
कठोरभक्ष्याऽदनपाटवं त-
द्यथा नराणां पतितद्विजानाम् ॥ ८ ॥

---

६) **वरवर्णिनी**= उत्तमाङ्गना । "वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी" इत्यमरः ।

७) नवीनभारते शृङ्गारवर्णनकाव्यापेक्षया राष्ट्रभक्तिप्रचोदकधीरोदात्तनायकचरितवर्णनपराणां काव्यानामेव जनादरो महानित्याशयः ।

८) **पतितद्विजानां** = पतितदन्तानां, दन्तरहितवदनानामित्यर्थः । "दन्तविप्राण्डजा द्विजाः" इत्यमरः । आधुनिकानां सरलबन्धकाव्येष्वेव भूयान् आदरः इत्यभिप्रायः ।

देशं च कालं च विचार्य सम्यक्
काव्यं वितन्वन्कविराट् कृती स्यात् ।
जन्ये प्रवृत्तः पृतनाधिनाथो
यथोभयज्ञो विजयं प्रयाति ॥ ९ ॥

योऽयं हि काव्ये रसभावपुष्टे
कुपण्डितो नो रमते विमूढः ।
विगीयमानो रसहेतिमान्यैः
कष्टां दशां हन्त सदाभ्युपैति ॥ १० ॥

यस्माद्रसो वै स इति प्रवक्ति
श्रुतिस्ततो मारयते रसं यः ।
स ब्रह्महत्यासमपापहेतुं
रसस्य हत्यां तनुते न किं नु ॥ ११ ॥

कृतौ गुणा एव विचारणीयाः
नामापि कर्तुर्न विचारणीयम् ।
कदापि नो संक्रमते हि शिल्पे
रूपादिकः शिल्पिगुणप्रपञ्चः ॥ १२ ॥

---

९) **उभयज्ञः**= आत्मबलं दैवबलं च यो जानाति सः ।

११) "रसो वै सः" तैत्तरीयोपनिषदः आनन्दवल्यां सप्तमानुवाकस्थमिदं वाक्यम् । सच्चिदानन्दरूपः आत्मा वै निश्चयेन रसः रसरूपः इत्यभिप्रायः ।

अस्पष्टभावा रहिता च वक्रैः
शब्दैरनिष्पन्नरसाकृतिर्मे ।
इयं कथं प्रौढजनस्य चेतो
बालेव गृह्यादिति संशयो मे ॥ १३ ॥

वक्तुं चरित्रं महनीयकीर्तेः
प्रवृत्तमेतद्द्विगुणं च काव्यम् ।
ग्राह्यं बुधानामपि गन्धशून्यं
पुष्पं यथा देवपदाब्जलग्नम् ॥ १४ ॥

श्रीमन्मायणसंततिप्रविलसत्पूर्वाचलोद्यद्रवेः ।
म्लेच्छध्वान्तकदम्बवारणपटुप्रोच्चंडदिव्यौजसः ।
कर्णाटक्षितिरक्षणक्षममतिप्रागल्भ्यपाथोनिधेः
विद्यारण्यमहामुनेः सुचरितं कुर्वन्तु कर्णे बुधाः ॥१५॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां कथावतरणं नाम प्रथमस्तरङ्गः ॥

---

१३) बालायाः कृतेश्च उपमानोपमेयभावः । स च श्लेषानुप्राणितः ।

१४) 'च'शब्दः अप्यर्थकः ।

१५) ध्वान्तकदम्बः= अन्धकारसमूहः ।

अथ द्वितीयस्तरङ्गः

जेजीयते भारतमंडलेऽस्मिन्
कर्णाटदेशः कमनीयशोभः ।
गोदावरीसह्यसुतातटिन्योः
मध्यंगतस्संगतसंजनाढ्यः ॥ १ ॥

तमालचूतादिमहीरुहाणां
छायामनोज्ञानि वनानि यत्र ।
विचित्रसस्यालिमनोहराणि
चेतो जनानां रमयन्ति भूयः ॥ २ ॥

कावेरिकाद्याः कमनीयरूपाः
पवित्रतीर्थप्रचुराश्च यत्र ।
दिव्यास्तटिन्यः कलनादवत्यः
प्रसन्नतोयाः प्रवहन्ति बह्वयः ॥ ३ ॥

अभ्रंकषाश्शैलगणा जनानां
अक्ष्णोः प्रमोदाय भवन्ति यत्र ।
सिद्धाश्रिता निर्झरिणीसुरम्याः
सह्यादयः सुन्दरकाननान्ताः ॥ ४ ॥

---

१) कर्णाटदेशः उत्तरभागे गोदावरीमारभ्य दक्षिणे कावेरीपर्यंतं पूर्वापरजलनिधिमध्ये वितता आसीदिति कविराजमार्गादि कर्णाटकभाषाग्रन्थेभ्यः अवगम्यते ।

४) **अभ्रंकषाः** = आकाशचुंबिनः अत्युन्नता इत्यर्थः ।

नाकोऽपि कर्णाटकदेशशोभां
निरीक्ष्य लज्जाविधुरः कथंचित् ।
निर्होतुकामो जनलोचनेभ्यः
कुत्रापि दूरे वसतीति मन्ये ॥ ५ ॥

अमुष्य सौन्दर्यहृतान्तरात्मा
वैकुण्ठवासाद्विरतो मुरारिः ।
आगत्य लक्ष्म्या यदुशैलशृङ्गे
निवासमंगीकुरुते सदैव ॥ ६ ॥

कठोरकैलासशिलाविमर्दात्
ग्लानिं शिवायाः पदयोर्निरीक्ष्य ।
वसत्युमेशः सहसैनमेत्य
तीरे सभार्यः कपिलातटिन्याः ॥ ७ ॥

कर्णाटदेशीयतरङ्गिणीनाम्
गुणान् शुभं शृण्वति पावनानाम् ।
निशम्य गंगाप्यभिमानभंगात्
खिन्ना किलाधोभुवनं प्रविष्टा ॥ ८ ॥

---

५) लज्जाकुलाः जनानां मुखं द्रष्टुं न पारयन्तीति सुविदितमिदम् ।

६) यदुशैलः = " मेलुकोटे " इति सुविदितं विष्णुक्षेत्रं कर्णाटदेशस्य मंड्यमण्डले विराजते ।

७) " नंजनगूडु " इति विदितचरं शिवक्षेत्रं मैसूरुमण्डले विभाति ।

जनाश्च तस्मिन्निवसंति संतः
शिवंकराचारपरा गुणज्ञाः ।
नैवास्ति तेषां चरिते कलङ्कः
संदृश्यते चेत्स मृगाङ्कबिम्बे ॥ ९ ॥

न कर्म तेषां विषमं जनानाम्
नानन्वयस्तद्वचने चकास्ति ।
नापह्नवस्तध्दृदये कदापि
ते वर्णनास्वेव महाकवीनाम् ॥ १० ॥

काव्येषु संदर्शितकौशला ये
रणे प्रकाशीकृतधीरमानाः ।
गृहागते दर्शितगौरवास्ते
कर्णाटदेशीयजना जयंति ॥ ११ ॥

---

९) कलङ्कः= १दोषारोपः २चिह्नम् कलङ्कोऽङ्कापवादयोरित्यमरः ।

१०) विषमं = असमीचीनम् ; अनन्वयः = असाङ्गत्यम् ।
अपह्नवः= सत्यनिगूहनम् "अपह्नवोऽपलापः स्यात् इत्यमरः"
विषमान्वयापह्नवाः अर्थालङ्कारविशेषाः अलङ्कारशास्त्रे
निरूपिताः ।

संप्राप्तसह्यतनयादिसरिद्विहारः
विख्यातीर्थनिकरभ्रमणप्रवीरः ।
पुष्पाढ्यकाननचररसुभगः समीरः
तेषां नियच्छति सदा नितरां प्रमोदम् ॥१२॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां कर्णाटदेशवर्णनं नाम द्वितीयस्तरङ्गः ॥

अथ तृतीयस्तरङ्गः

विभाति तस्मिन्विषयेऽतिरम्ये
  श्रीतुङ्गभद्राख्यसरिद्वरेण्या ।
वातोऽपि यद्वारिकणप्रसक्तः
  सुतुङ्गभद्रं वितनोति जन्तोः ॥ १ ॥

वार्बिन्दुमुक्ताफलभूषिता या
  प्रफुल्लपद्मालिसुगंधिमाल्या ।
कृष्णाधुनीं प्रेमसखीमिव स्वां
  गत्या सुलीलाञ्चितयाऽभियाति ॥ २ ॥

आभाति मध्ये विषयं सरिद्या
  तिर्यक्प्रयान्ती शशिरश्मिशुभ्रा ।
कर्णाटलक्ष्मी सुविशालवक्षः-
  स्थलस्थिता मौक्तिकमालिकेव ॥ ३ ॥

अस्यास्तटे भृङ्गगिरौ वसंत्या
  वाण्या समध्यापितगीतनृत्याः ।

---

१) तुङ्गभद्रा = कर्णाटदेशे प्रवहन्ती पावनतरा काचन नदी कृष्णाख्यनद्या सह संमिलति ।
तुङ्गभद्रं = निरतिशयशुभम् ।

कल्लोलमालाः कलनादनृत्यैः
न कस्य लोके हृदयं हरन्ति ॥ ४ ॥

तीरेऽस्ति तस्याः सरितः सुपुण्या
पम्पाभिधाना सुजनैकभूः पूः ।
यस्यां महेशः कृतसन्निधानः
साक्षाद्विरूपाक्ष इति प्रसिद्धः ॥ ५ ॥

लिङ्गात्मना लोकहिताय नित्यं
यस्यां गिरीशे कृतसन्निधाने ।
गङ्गेव सा भाति हि तुंगभद्रा
देवं विरूपाक्षमुपासमाना ॥ ६ ॥

---

४) शृङ्गगिरिः = कर्णाटकदेशे चिक्कमङ्गळूरुमण्डले वर्तते । तुङ्गभद्रातीरे विराजमानमिदं पुरमतीव नयनमनोहरमावर्जयति यात्रिकमनांसि । मध्ये पुष्मेकरशैलः वर्तते । तस्मिन् मलहानिकरेश्वरनाम विश्रुतं शिवलिङ्गं प्रविभाति । महीतलमहितः श्रीशङ्कराचार्यसंस्थापितः जगद्गुरुमठः तथा शारदापीठं च अत्रैव प्रविराजते । भारतवर्षस्य प्रमुखयात्रास्थलेष्वन्यतममिदम् असंख्यातयात्रिकानामभिगम्यस्थानमिति सुविदितमस्ति ॥

५) इदानीं हंपेति प्रसिद्धं कर्णाटकदेशीयबळ्ळारिमण्डले वर्तते । अत्रस्थः विरूपाक्षदेवालयः प्राचीनतमः ।

अदूरदेशे प्रविभाति यस्याः
पम्पाभिधाना सरसी मनोज्ञा ।
सीतापतेर्या धृतिवज्रसालं
पुरा शतघ्नीव बिभेद तूर्णम् ॥ ७ ॥

वसन्ति यस्यां बहवः प्रशान्ताः
सद्वैदिकाचारपरा द्विजेन्द्राः ।
श्रीमद्विरूपाक्षमनुप्रपन्नाः
देवा इव क्षोणितलावतीर्णाः ॥ ८ ॥

तत्रावसत्कश्चन भूसुरेन्द्रः
श्रीमायणो नाम वसिष्ठकल्पः ।
वेदेषु साङ्गेषु समस्ततन्त्रः
मन्त्रादिशास्त्रेष्वपि लब्धवर्णः ॥ ९ ॥

यदीयसत्कारविशेषलाभा-
द्गतक्लमोऽभूद्रघुवंशकेतुः ।

---

७) **पम्पाभिधाना सरसी** = श्रीमद्रामायणप्रसिद्धं पम्पासरः, यत्र सीताविरहसन्तप्तः रामः हनूमता मिलितः ।

९) **वसिष्ठकल्पः** = वसिष्ठसमानः "ईषदसमाप्तौ कल्पब्देश्य देशीयरः" इत्यनुशासनात् कल्पप् प्रत्ययः ।

दुर्दम्यदैतेयसहस्रहन्ता
तन्मौनिगोत्राम्बुधिपूर्णचन्द्रः ॥ १० ॥

श्रीमद्विरूपाक्षनिविष्टचेताः
विन्यस्य भारं निखिलं महेशे ।
नृपादिसेवामपि भूसुरेन्द्रो
नाचिन्तयत्कुक्षिकृते मनस्वी ॥ ११ ॥

अरुंधतीतुल्यगुणा बभूव
सा श्रीमती नाम वधूरमुष्य ।
हीरायते या हि गुणैरमोघैः
पतिव्रतापालिललन्तिकायाम् ॥ १२ ॥

---

१०) मौनिगोत्राम्बुधिपूर्णचन्द्रः = भारद्वाजगोत्रोत्पन्नः इत्याशयः । पितृवाक्यपरिपालनाय वनवासं कर्तुं प्रस्थितं स्वतपोवनमागतं सीतालक्ष्मणसमेतं रामं तथा रामं अन्विष्यन् सैन्यपौरवर्गसमेतमागतं भरतं च तपःप्रभावनिष्पन्नमृष्टान्नेन भरद्वाजः सत्कृतवानिति रामायणी कथात्रानुसन्धेया ।

१२) वधूः= पत्नी "वधूर्जाया स्नुषा स्त्री चे"त्यमरः ।
हीरायते= वज्रमणिरिवाचरति "श्रीहर्षं कविराजराजिमकुटालङ्कारहीरस्सुतं श्रीहीरः सुषुवे" इति नैषधकारः ।

नैवानुरूपं मिथुनं जगत्यां
संयोजयत्येष इति स्वयंभूः ।
निन्दां प्रमार्ष्टुं किल नित्यसक्तां
संयोजयामास सदम्पती तौ ॥ १३ ॥
तद्भूसुरद्वंद्वमनाकिलभ्यं
परस्परप्रेमरसप्रवृद्धम् ।
आनन्दभूमानमतीव हृद्यं
उवास तत्रानुभवच्चिरेण ॥ १४ ॥
काले गते सा द्विजराजकान्ता
शुभे दिने मङ्गलयोगयुक्ते ।
जगद्धितार्थं सुषुवे कुमारं
साक्षादिवेशस्य महाप्रसादम् ॥ १५ ॥
प्रसन्नमभ्रं शिशुजन्मकाले
प्रसूमनोरङ्गमिवावभासे ।
संवीजनायैव समीरणोऽपि
तस्य लोकस्य ववौ सुमन्दम् ॥ १६ ॥
अस्य प्रभावेण जनिष्यमाणां
वृद्धिं हिरण्यस्य विभाव्य तुष्टः ।

---

१३) मिथुनम्= "स्त्रीपुंसौ मिथुन"मित्यमरः
१६) प्रसूः= जननी "जनयित्री प्रसूरि"त्यमरः ।

हिरण्यरेताश्च तदा सुदीप्तो
जग्राह हव्यं शिशुजन्मकाले ॥ १७ ॥
किं विस्तरेणार्भकजन्मकाले
जातैर्निमित्तैरतिशोभनैस्ते ।
पौरा विनिश्चित्य महानुभावं
शिशुं तदानीं नितरां ननन्दुः ॥ १८ ॥
स मायणो बंधुजनैस्समेतः
तदातिमात्रं सुतलाभहृष्टः ।
कृत्वा यथावद्विधिमङ्गलानि
चकार पुत्रस्य च माधवाख्याम् ॥ १९ ॥
इति विधिविहितैस्तैर्मङ्गलैर्वर्धितोऽयं
शिशुरधिगतहर्षैर्बंधुभिर्लाल्यमानः ।
उडुपतिमनुकुर्वन् शुक्लपक्षाभिजातम्
उपचिततनुकांतिः प्राप वृद्धिं क्रमेण ॥२०॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां माधवजननं नाम तृतीयस्तरङ्गः ॥

---

१७) हिरण्यरेताः= अग्निः "हिरण्यरेता हुतभुग्दहनो हव्यवाहनः इत्यमरः ।

अथ चतुर्थस्तरङ्गः

काले गते भूसुरधर्मपत्नी
प्रासूत पुत्रौ शुभलक्षणाढ्यौ ।
सर्वात्मना ज्येष्ठसुतानुरूपौ
क्रमेण सा सायणभोगनाथौ ॥ १ ॥
विप्रालये वेदनिनादपूते
त्रयः कुमारा नितरां सुदीप्ताः ।
भान्ति स्म यज्ञालयमध्यदेशे
विभ्राजमाना इव हव्यवाहाः ॥ २ ॥
अध्यापयामास पिता सुतांस्तान्
सर्वाश्च विद्याः स्वयमेव विद्वान् ।
विलोक्य तेषामथ नैपुणीं ताम्
विद्यार्जने सोऽपि जहर्ष भूयः ॥ ३ ॥
पुत्रेषु तेष्वप्यतिबुद्धिमत्सु
ज्येष्ठो यथाभूज्जनुषा तथैव ।
तया च लोकोत्तरया च बुद्ध्या
ज्येष्ठत्वमापद्यत माधवोऽयम् ॥ ४ ॥

---

२) यज्ञालयमध्यदेशे – यज्ञशालासु दक्षिणाग्निः, गार्हपत्यः आहवनीयः इति त्रयः अग्नयः प्रतिष्ठाप्यन्ते ।

गम्भीरभावं च विनीततां च
लावण्यकान्तं च शरीरमस्य ।
विलोक्य पम्पापुरपौरवर्गः
श्लाघाप्रकम्पानि दधौ शिरांसि ॥ ५ ॥

आसेवमानं प्रथमाश्रमं तं
प्रदीप्ततेजः प्रसराभिरामम् ।
ते मेनिरे वामनमादिदेवं
समागतं लोकहिताय भूयः ॥ ६ ॥

वेदे पुराणेष्वपि धर्मशास्त्रे
कोषेषु काव्येष्वपि पाणिनीये ।
स ज्योतिषे न्यायनये च पित्रा
कोटिं परां प्राप सुशिक्षितोऽयम् ॥ ७ ॥

---

६) **प्रथमाश्रमम्** = ब्रह्मचर्यम् । देवानुद्धर्तुकामः भगवान् नारायणः वामनावतारं कृत्वा दैत्यचक्रवर्तिनं बलिं पादत्रयपरिमितभूमियाचनमिषेण निगृह्य पातालं प्रापयामासेति भागवती कथा ।

७) **पाणिनीये** = व्याकरणशास्त्रे । "काणादं पणिनीयं च सर्वशास्त्रोपकारकमि"त्यभियुक्तोक्तिः ।
न्यायनये=प्राचीनन्यायनवीनन्यायाभिधभेदद्वयवति तर्कशास्त्रे ।

अत्रान्तरे पण्डितयात्रिकेभ्यः
शुश्राव सोऽयं विततानुभावम् ।
श्रीदक्षिणाम्नायमठेशविद्या
तीर्थाभिधानस्य यतीन्द्रमौलेः ॥ ८ ॥

वेदान्तविद्यामनधीतपूर्वां
तद्योगिवर्यादधिगन्तुकामः ।
शृङ्गाचलं गन्तुमियेष चित्ते
विद्यार्जनासक्तमनोरथोऽयम् ॥ ९ ॥

स्थितेऽपि ताते निखिलागमज्ञे
वृतो गुरुत्वेन स योगिवर्यः ।
वरं गृहिभ्यो यतिनो हि लोके
वेदान्तबोधे नितरां प्रशान्ताः ॥ १० ॥

श्रुत्वा कुमारस्य विनिश्चयं तं
पितानुमेने सुतवत्सलोऽपि ।
निहन्ति लोके न हितं सुतानां
वियोगभीतिं कृतिनोर्हि पित्रोः ॥ ११ ॥

---

१०) **वरं गृहिभ्य इति** = वरमित्यव्ययम् । "याच्ञा मोघा वरमधि-गुणे" इति कालिदासः ।

तातेनानुमतस्तथैव जननीं चिन्ताकुलां सान्त्वयन्
तत्पादौ प्रणिपत्य बान्धवजनानापृच्छ्य सोऽयं ततः ।
भक्त्याऽऽसेव्य च देवदेवमपि तं देवं विरूपेक्षणम्
भ्रात्रा तेन च सायणेन सहितः शृङ्गाचलं प्रस्थितः ॥ १२ ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां शृङ्गाचलप्रस्थानं नाम चतुर्थस्तरङ्गः ॥

॥ अथ पञ्चमस्तरङ्गः ॥

सुदूरमध्वानमसौ विलङ्घ्य
श्रृङ्गाचलं प्राप स यत्र वीथ्यः ।
विशङ्कटा योगिवरेण्यशिष्यैः
परश्शतैर्नित्यचिता अभूवन् ॥ १ ॥

ददर्श तत्रैव मठे प्रशान्ते
वसन्तमेकान्तविहारशीलम् ।
विद्यासुतीर्थाभिधयोगिवर्यं
महानुभावं महसां निधानम् ॥ २ ॥

अदृष्टपूर्वं स निरीक्ष्य तस्य
तेजो मुनेर्विस्मयपूरमग्नः ।
क्षणेन विष्टम्भितसर्वगात्रः
शिलासमुत्कीर्ण इवाबभासे ॥ ३ ॥

---

१) **विशङ्कटा** = विशाला "विशङ्कटं विशालं स्या"दिति हलायुधः ।

२) **विद्यातीर्थ**यतींद्रमित्यर्थः ।

३) **विष्टम्भितसर्वगात्रः** = विष्टंभितानि = प्रतिबद्धानि सर्वाणि गात्राणि यस्य सः । "विष्टम्भः प्रतिबंधः " इति हलायुधः ।

विनीतभावानतपूर्वकाय-
स्तदीयपादाम्बुजयोर्निपत्य ।
व्यजिज्ञपन्मायणनन्दनोऽसौ
मनोरथं स्वं मधुरैर्वचोभिः ॥ ४ ॥

स सर्वविज्ञः परिगृह्य शिष्यम्
अध्यापयामास सहानुजं तम् ।
शिष्टं न किञ्चित्किल वेदनीयम्
वेदान्तशास्त्रेष्वखिलेषु तस्य ॥ ५ ॥

योगीन्द्रवर्याप्तसमस्तविद्यः
सूर्यात्तसम्पूर्णकलश्शशीव ।
बभौ कुमारस्स तुतोष योगी
स भार्गवेणेव पुरा पुरारिः ॥ ६ ॥

उपास्य चैवं कतिचिद्दिनानि
निर्गन्तुकामं परिपूर्णकामम् ।
महाप्रभावो यतिबृन्दमौलिः
तमभ्यनुज्ञार्थिनमेवमूचे ॥ ७ ॥

---

६) स भार्गवेणेव पुरा पुरारिः= **भार्गवः**= परशुरामः; भार्गवरामस्य धनुर्विद्यागुरुः परमेश्वरः शिष्यस्य रामस्य चापागमनैपुण्येन परितुष्टः तस्मै स्वपरशोरर्धं पारितोषिकत्वेन प्रायच्छत् । ततः शिवः खण्डपरशुरिति रामः परशुराम इति च प्रसिद्धिं गतः इतिपुराणविदः ।

वत्सासि धन्यः परिपूर्णविद्यः
  महामतिः कार्यपटुर्गुणी च ।
विद्यागुणैरभ्यधिकस्तदन्यः
  मदीयशिष्येषु न दृश्यते हि ॥ ८ ॥

माहात्म्यसङ्ख्यापकलक्षणानि
  प्रोक्तानि शास्त्रेषु बहूनि यानि ।
पश्यामि तेऽङ्गे सुकुमार तानि
  सुव्यक्तरूपाणि शुभान्वितानि ॥ ९ ॥

अतस्त्वया यत्करणीयमद्य
  ब्रवीमि कल्याणकरं धरायाः ।
कृतं हि लोके सुफलं प्रसूते
  तेजस्विना मानवपुङ्गवेन ॥ १० ॥

म्लेच्छैरिदानीं किल भारतेऽस्मिन्
  विलोडितं वैदिकधर्मवर्त्म ।
उपैति कालुष्यमतीव शुद्धं
  वराहयूथैस्सरसीव नीरम् ॥ ११ ॥

निघ्नन्ति धेनूर्वनिता हरन्ति
  विभ्रंशयन्ति प्रसभं द्विजातीन् ।
भञ्जन्ति देवायतनानि नीचाः
  बलात्प्रगृह्णन्ति नृणां धनानि ॥ १२ ॥

नृपाश्च ते क्षत्रियवंशजाता
अन्योऽन्यसंरूढसपत्नभावाः ।
अनैकमत्येन विहीनसत्त्वा
न म्लेच्छशक्तेर्दमने समर्थाः ॥ १३ ॥

ब्राह्मेण तेजःप्रसरेण सम्यक्
क्षात्रप्रतापो यदि दीपितः स्यात् ।
सपत्नसार्थं प्रदहेत्तदानीं
घृतेद्धवह्निस्समिधामिवौघम् ॥ १४ ॥

असंहतिप्राप्तपराभवास्ते
संयोजिताश्चेत्सुदृढा भवेयुः ।
अत्यल्पसारा बहवो मिलित्वा
कुर्युर्महत्कार्यमिति प्रवादः ॥ १५ ॥

अस्मिन्महाकार्यभरे समर्थं
नियोजयिष्यामि भवन्तमेव ।
त्वद्ब्रह्मतेजःप्रसरेण लोके
म्लेच्छान्धकारः प्रशमं प्रयातु ॥ १६ ॥

नीत्या महत्या भवदीयया ते
संयोजिताः क्षत्रियभूमिपालाः ।
धर्मद्रुहुन्मूलनवीतशङ्का
रक्षन्तु पृथ्वीं सुचिरं कृतार्थाः ॥ १७ ॥

निर्वाह्य चैतत्करणीयमग्र्यम्
दिगन्तसुख्यातसुकीर्तिमान्यः ।
तोष्टूयमानः सकलैश्च लोकै-
र्वत्स प्रमोदस्व चिरं धरायाम् ॥ १८ ॥

त्वरस्व शीघ्रं शुभमस्तु तुभ्यम्
यत्नस्त्वदीयस्सफलत्वमेतु ।
निष्कण्टके धर्मपथेऽतिमात्रम्
नन्दन्तु सन्तश्चिरमस्तु शान्तिः ॥ १९ ॥

विद्यातीर्थयतीश्वरेण गदितस्त्वेवं विनीताग्रणी-
राशीर्वादपरम्परासहचरीमाज्ञां तदीयां शुभाम् ।
मौलौ सद्गुरुभक्तिभावनमिते कुर्वन्नमस्कृत्य तं
कृच्छ्रात्तेन महात्मनाप्यनुमतः प्रत्याययौ सानुजः ॥२०॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां गुरूपदेशो नाम पञ्चमस्तरङ्गः ॥

---

१९) **धर्मपथे**=धर्ममार्गे धर्मस्य पन्थाः धर्मपथः तस्मिन् ऋक्पूरब्धूःपथामानक्षे इत्यनुशासनेन समासान्तः 'अ'प्रत्ययः ।

॥ अथ षष्ठस्तरङ्गः ॥

प्रत्यागतौ तौ सुनिरीक्ष्य पुत्रौ
ननन्दतुस्तत्पितरौ प्रकामम् ।
निनाय कश्चित्समयं सुखेन
स माधवो बान्धवलोचनेन्दुः ॥ १ ॥

कुलप्रदीपं विनयाभिरामं
सर्वासु विद्यासु च लब्धवर्णम् ।
समीषतुस्तत्पितरौ जवेन
कर्तुं द्वितीयाश्रमभाजनं तम् ॥ २ ॥

वैवाहिके कर्मणि सम्प्रवृत्तं
तातं विनीतो मधुरैर्वचोभिः ।
स श्रावयामास गुरोर्निदेशम्
गार्हस्थ्यगेहार्गललोहयन्त्रम् ॥ ३ ॥

गुर्वाज्ञया लोकहिते सुकार्ये
निबद्धकक्षं तनयं विलोक्य ।
स्नुषागमोत्साहरसप्रपूर्णा
सा श्रीमती खेदभरार्दिताभूत् ॥ ४ ॥

---

२) लब्धवर्ण = विचक्षणं, पंडितम् । "धीरो धीमान् लब्धवर्णो विपश्चित् वृद्धो विद्वान्" इति हलायुधः ।
द्वितीयाश्रमभाजनं = विवाहितम् ।

पिता तु विद्वान्सुविचार्य बुद्धौ
विधर्मिसन्दूषितभारतं च ।
पुत्रं च दक्षं प्रतिसंविधाने
ददौ न किञ्चित्प्रतिकूलवाचम् ॥ ५ ॥

जगद्धिताधानगृहीतदीक्षं
शशाक न स्वैकहिताय तातः ।
निरोद्धुमीष्टे हरिणाङ्कबिम्बम्
स्वचन्द्रशालोपरि को हि बन्द्धुम् ॥ ६ ॥

यथाभिलाषं प्रविधातुमेनं
तातोऽनुमेने निखिलागमज्ञः ।
लोके परार्थाय सदा प्रवृत्ताः
सन्तस्तटिन्यश्च न रोधनीयाः ॥ ७ ॥

एवं कथञ्चिद्दलितेऽन्धकारे
विवाहरूपे नितरां प्रहृष्टः ।
सञ्चिन्तयामासतरां विवेकी
मार्गं महाकार्यनगाधिरोहे ॥ ८ ॥

---

५) **प्रतिसंविधाने** = प्रतिक्रियायाम् ।
६) **हरिणाङ्कबिम्बम्** = चन्द्रमण्डलम् ।

स निश्चिकायाथ विचार्य सम्यक्
तपः सहायेन विना स्वयत्नः ।
नानन्यसाधारणकार्यसिद्धौ
पुष्णाति सामर्थ्यमिति प्रकामम् ॥ ९ ॥

न लौकिकान्येव हि साधनानि
ददत्यसामान्यफलं धरायाम् ।
तपः प्रभावेण तु संयुतानि
महाशुभोदर्कफलानि दद्युः ॥ १० ॥

अल्पोऽपि यत्नो मनुजप्रयुक्तः
प्रोत्साहितो दैवबलेन सम्यक् ।
शक्नोत्यदभ्राय फलाय लोके
वृक्षो यथा दोहदसम्पदेद्धः ॥ ११ ॥

भूदेववंशाम्बुधिपूर्णचन्द्र-
स्ततस्तपोभिर्भुवनेश्वरीं सः ।
जगाम सम्प्रीणयितुं भवानीं
तपोवनं सिद्धमहर्षिजुष्टम् ॥ १२ ॥

---

१०) उदर्कः = भाविफलम् । " उदर्कः फलमुत्तरम् " इति अमरहलायुधौ ।

११) अदभ्राय = प्रचुराय । " प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु " इत्यमरः ।

१२) भूदेवः=ब्राह्मणः "द्विजात्यग्रजन्मभूदेववाडवाः" इत्यमरः ।

सुतुङ्गभद्राहितचित्तवृत्तिः
  स तुङ्गभद्राविहितावगाहः ।
तपोविधानोपनिपत्प्रवेदी
  तपो विधातुं महदुद्यतोऽसौ ॥ १३ ॥

स्वार्थाय विश्वातिशयाय लोके
  तपन्त्युदग्राणि तपांसि केचित् ।
जगद्धितायैव तपःस्थितेन
  समो नु कः स्याद् भुवनत्रयेऽपि ॥ १४ ॥

निधाय चित्तं गिरिजापदाब्जे
  तपस्यतस्तस्य फलाशनस्य ।
मासा व्यतीयुः कतिचिद्भवानी-
  सन्दर्शनेच्छा ववृधे तु भूयः ॥ १५ ॥

ततः फलानि प्रविहाय धीरः
  जलाशनो घोरतरं तपस्यन् ।
यदाऽप्रसन्नां बुबुधे मृडानीम्
  वाताशनः सन् तपसि स्थितोऽभूत् ॥ १६ ॥

---

१३) सुतुङ्गभद्राहितचित्तवृत्तिः = लोकोत्तरजगत्कल्याणकृत-संकल्पः ।

तुङ्गभद्राविहितावगाहः = तुङ्गभद्राकृतस्नानः ।

प्राणांश्च सर्वान्स निरुध्य चान्ते
तपो महोदग्रमुपासमानः ।
ब्रह्मत्वलाभेच्छुमहामुनीन्द्र
गाधेयशङ्कां जनयाम्बभूव ॥ १७ ॥

एवं सुघोरे तपसि स्थितस्य
संवत्सराणां विगते च षट्के ।
अभूत्प्रसन्ना भुवनेश्वरी सा
कृपार्द्रचित्ता त्रिजगत्सवित्री ॥ १८ ॥

वत्स प्रसन्नास्मि कृतं श्रमेण
वृणीश्व चेष्टार्थमिति ब्रुवाणा ।
मन्दस्मितालिङ्गितरम्यवक्त्रा
तेजोमयी सा ददृशे पुरस्तात् ॥ १९ ॥

---

१७) **गाधेयः** = विश्वामित्रः । विश्वामित्रो महाराजः ब्रह्मर्षिं वसिष्ठं प्रधर्षयितुमुद्युक्तः तस्मिन् बहून्यस्त्राणि प्रयुयुजे । तानि सर्वाणि ग्रसति स्म वसिष्ठेन पुरतः स्थापितः ब्रह्मदण्डः । एवं वसिष्ठब्रह्मतेजसा पराजितः । "धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् । एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे" इति विलपन् ब्रह्मर्षित्वमधिगन्तुं घोरं तपः चचार । अन्ते कृतकृत्यो बभूव ॥ इति रामायणे बालकाण्डे ।

निरीक्ष्य चाग्रे जगदीश्वरीं तां
प्रमोदपाथोनिधिपूरमग्नः ।
अम्बेत्युपक्रम्य निरुद्धकण्ठः
तत्पादमूले प्ररुदन्लुलोठ ॥ २० ॥

तथाविधं तं नियमैः कृशाङ्गं
दृष्ट्वाम्बिकाया हृदयेऽप्यपूर्णः ।
उद्वेलवात्सल्यरसप्रवाहो
बाष्पच्छलात्किं बहिरुल्ललास ॥ २१ ॥

स्वपादमूले पतितं कुमारं
उत्थाप्य देवी नितरां कृपालुः ।
वाचं सुधाम्भोनिधिपूरमित्रम्
दन्तांशुभिस्तं विकिरन्त्युवाच ॥ २२ ॥

आनीतवत्यस्मि बलादिदानीं
वत्स त्वदीयेन तपोगुणेन ।
भक्त्या च तुष्टा परया तवाहं
यदिच्छसि त्वं वद तद्ददामि ॥ २३ ॥

---

२३) **तपोगुणेन** = तपसां गुणेन, तप एव गुणः, इति द्विध
निष्पत्तिः ।

एवं ब्रुवाणां जगदादिमायां
स माधवो मायणवंशकेतुः ।
स्तुत्वाच नानानुतिभिश्च नत्वा
भक्त्या निबद्धाञ्जलिरेवमूचे ॥ २४ ॥

यदि प्रसन्नासि जगद्धिताय
गुरोर्निदेशेन मयि प्रवृत्ते ।
प्रसीद कार्यस्य सुसाधनेऽस्याऽ-
वन्ध्यं क्रमं मेऽनुगृहाण मातः ॥ २५ ॥

तन्माधवोदीरितवाक्यमार्या
निशम्य तस्मै प्रतिवाचमूचे ।
शिवङ्करःश्लाघ्यतमः प्रयत्नः
तथाप्ययं ते सुलभो न वत्स ॥ २६ ॥

धर्मद्रुहस्ते किल रूढमूलाः
महाबला मर्दयितुं न शक्याः ।
सुसंहतेनातिरथान्वितेन
प्रचण्डसैन्येन विना न जातु ॥ २७ ॥

सेनापि सा वीरनृपाश्रितैव
शत्रून्विजेतुं प्रभवेत्समीके ।

स्कन्दं समाश्रित्य हि देवसेना
दैतेययुद्धे विजयं प्रपेदे ॥ २८ ॥

नृपोऽपि दुर्गाश्रित एव कामम्
सुदुष्प्रधर्षो भविता परेषाम् ।
ग्राहो ह्रदान्तःस्थितिवृद्धशक्ति-
र्न मन्यते किं करिणं तृणाय ॥ २९ ॥

दुर्गप्रतिष्ठापि विना प्रभूतं
रायं कथं स्यात्सुकरा कुमार ।
विनैवमृद्भिस्स कथं कुलाल
स्तनोतु लोके रचनां घटस्य ॥ ३० ॥

---

२८) तारकासुरप्रपीडितदेवसमूहं समुद्धर्तुं परमेश्वरः हैमवतीसुतां परिणीय तस्यां स्कन्दं पुत्रमजनयत् । स्कन्दः देवसेनानायको भूत्वा तारकमभिगम्य जघानेति स्कान्दपुराणान्तर्गता कथा ।

२९) तृणाय मन्यते इत्यत्र "मन्यकर्मण्यनादरे । विभाषाऽप्राणिषु" इति सूत्रेण चतुर्थी ।
ग्राहः = जलचरविशेषः " अवहारः स्मृतो ग्राहः " इति हलायुधः ।

३०) **रायं** = धनं "द्युम्नं द्रव्यं द्रविणं राः स्वर्णं" इति हलायुधः ।

त्वदीयजन्मान्तरदुर्विपाको
　　रुणद्धि मां ते वसु सम्प्रदातुम् ।
पुत्राय सुस्वादु दधि प्रदात्रीम्
　　कासो यथा भीषयते सवित्रीम् ॥ ३१ ॥

तस्मादिदानीं तपसश्च यत्ना-
　　द्विरम्य गेहं व्रज बन्धुवर्गः ।
त्वद्दर्शनेच्छुर्हृषिता प्रकामं
　　जन्मान्तरे ते भवितेष्टसिद्धिः ॥ ३२ ॥

एवं ब्रुवाणां पुनरेवमूचे
　　स्थिरप्रतिज्ञः कृतिनां वरेण्यः ।
दन्दह्यमाने भवनेऽतिमात्रम्
　　कालान्तरीयेण जलेन किं स्यात् ॥ ३३ ॥

लोकाय धर्मक्षतिपीडिताय
　　प्रसीद लोकत्रयमातरद्य ।
महामयाक्रान्तनरो धरण्याम्
　　नार्हत्युपेक्षां हि चिकित्सकस्य ॥ ३४ ॥

---

३१) कासः = रोगविशेषः ‘ केम्मु ’ इति भाषायाम् । “क्षवथुः कथ्यते कासः” इति हलायुधः ।

३२) यत्नाद्विरम्य = ‘ वारणार्थानामीप्सित ’ इत्यपादानसंज्ञा । ‘ अपादने पंचमी ’ इति पंचमी ।

गुरोर्निदेशामृतपायिनो मे
नैवास्ति सांसारिकभोगतृष्णा ।
सुनारिकेलाम्बुनिपानतृप्तो
न क्षारकूपोदकमीहते हि ॥ ३५ ॥

अहं त्विदानीं प्रविहाय सर्वा–
न्कामांस्तथा कर्मकदम्बकं च ।
गृह्णामि सद्यो यतिसम्प्रदायम्
लोकः सुखी येन भवेदहं च ॥ ३६ ॥

एवंकृते प्राक्तनकर्म कर्तुम्
नैवान्तरायं प्रभवेत्किलाम्ब ।
त्यक्तानि कर्माणि फलाय न स्युः
समूलनिर्दग्धतरुर्यथा हि ॥ ३७ ॥

तुर्याश्रमस्थो हि जगद्धिताय
कर्माणि कुर्वन्न च तैर्विलिप्तः ।
भवामि तत्राभिनिवेशशून्यो
यथातिमत्तोऽखिलकर्मभिः स्वैः ॥ ३८ ॥

---

३६) 'जन्मान्तरे ते भवितेष्टसिद्ध'रिति । संन्यासो जन्मान्तरसमान इति वेदान्तिनः । अतो संन्यासग्रहणेन जन्मान्तरे इष्टसिद्धिः भवितेति देवीवचनानुपालनेन स्वेष्टसिद्धिर्भविष्यति इति भावः ।

इहैव मातः प्रतिबन्धकस्य
निवर्तनादस्तु मयि प्रसादः ।
मेघापिधानापगमे धरित्रीम्
प्रकाशयत्येव हि शीतरश्मिः ॥ ३९ ॥

अन्तर्महासत्व रसप्रवाहं
वचो द्विजेन्द्रस्य निशम्य देवी ।
श्लाघाप्रकम्पोच्चलनप्रभूतै-
र्भूषारवैः पूरयति स्म काष्ठाः ॥ ४० ॥

जगाद सा धन्यतमोऽसि वत्स
स्थिरप्रतिज्ञश्च महाप्रभावः ।
वत्से गजास्ये प्रविलोकये यां
विलोकये त्वय्यपि नैपुणीं ताम् ॥ ४१ ॥

आरम्भ एषस्सुमहामतेस्ते
बाढं प्रसिद्ध्येज्जगतीहिताय ।
म्लेञ्छाश्च ते नीतिकृपीटयोनौ
प्रयान्ति सर्वे शलभत्वमाशु ॥ ४२ ॥

---

४१) 'वत्से गजास्य' इति । गजाननोऽतीव बुद्धिमानत एव सर्वकर्मस्वग्रपूजागौरवमुपलब्धवानिति पुराणविदः ।

यदेच्छसि त्वं द्रविणं तदैव
क्रोशद्वयव्यायतभूमिभागे ।
पतिष्यति त्वामभितो मुहूर्तं
मम प्रसादात्कनकप्रवृष्टिः ॥ ४३ ॥

सुविनयनतमौलिं माधवं योगिवर्यं ।
त्रिभुवनजननी सा तं वरेणानुगृह्य ॥
नयनपथसमक्षं पश्यतस्तस्य देवी ।
क्षणरुचिपरिपाटीं सन्दधार क्षणेन ॥ ४४ ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां तपश्चरणं नाम षष्ठस्तरङ्गः ॥

---

४३) **क्रोशः**= योजनस्य चतुर्थो भागः । [Two or three miles]

४४) **'क्षणरुचिपरिपाटी'ति** = अदृश्याभूदित्यर्थः । "सौदामन्य-चिरांशुक्षणरुचिरैरावती च विज्ञेया " इति हलायुधः ।

॥ अथ सप्तमस्तरङ्गः ॥

अथो महात्मा वरदानहृष्ट-
स्तुर्याश्रमस्वीकरणेन सद्यः ।
कृतार्थतां कर्तुमियेष चित्ते
वरस्य देव्या निजजन्मनश्च ॥ १ ॥

गुणानुरूपं परमं यतीन्द्रम्
स्वस्योपदेशग्रहणाय सद्यः ।
अन्वेष्टुमालोचन दीर्घमार्गे
मनस्तदीयं सुचिरं चचार ॥ २ ॥

मनोबृसीं तस्य तदारुरोह
विद्यासुतिर्थो यतिसार्वभौमः ।
नृसिंहयोगीन्द्र कराब्जजातो
महानुभावो जगदेकवन्द्यः ॥ ३ ॥

श्रीदक्षिणाम्नाययतीन्द्रपीठे
शृङ्गाद्रिमध्यप्रविराजमाने ।

---

१) तुर्याश्रमस्वीकरणं = संन्यासग्रहणं ।
३) बृसीं = यत्युपवेशनपीठं ।

शूलीव कैलासमहाद्रिकूटे
विभ्राजमानोऽनुपमप्रभावः ॥ ४ ॥

तस्मात्सुतीर्थ्याद्गुरुकल्पभूतेः
संन्यासदीक्षामुलपभ्य तूर्णम् ।
कर्माणि सर्वाण्यपि धर्मशत्रू-
न्निर्दग्धुमिच्छुर्निखिलान्प्रतस्थे ॥ ५ ॥

दिशं च मैत्रावरुणेस्तदानी-
मभिप्रयास्यन्कतिचिद्दिनानि ।
शान्तापतेर्जन्मभुवं महर्षे-
स्तच्छृंगगिर्याश्रममाजगाम ॥ ६ ॥

---

४) श्रीशृङ्गगिरीशारदापीठः स दक्षिणाम्नायपीठ इति प्रसिद्धिः । श्रीमच्छंकरभगवत्पादैश्चतुर्दिक्षु चत्वारो मठाः स्थापिताः । तेषामाम्नायपीठ इति प्रसिद्धिः । पूर्वस्यां दिशि पुर्यां गोवर्धन-मठः; दक्षिणस्यां शृङ्गगिरिमठः; प्रतीच्यां द्वारकापीठः, उत्तरस्यां दिशि बदर्यां ज्योतिर्मठः इति चत्वार्याम्नायपीठानि प्रसिद्धानि ।

६) **मैत्रावरुणेर्दिशं** = अगस्त्यचरितामाशां, दक्षिणदिशमित्यर्थः । शांतापतेः ऋष्यशृङ्गस्य महर्षेः जन्मभुवं जन्मदेशं शृङ्गगिरि-मित्यर्थः- = शृङ्गगिरौ विभांडकमुनेराश्रम आसीत् । तत्र विभांडकपुत्रो ऋष्यशृङ्गो मृगीगर्भे जातः इति स्थलपुराणम् ।

कृतावतारा जगतीहितार्थं
भक्तेष्टविश्राणनकल्पवल्ली ।
वाणी सदाङ्गीकुरुते निवासं
श्रीशङ्कराचारमतेन यत्र ॥ ७ ॥

यमष्टमीचन्द्रसरूपगत्या
यान्ती समावेष्टयै सिताच्छतोया ।
वाण्यै धरित्रीविहितोपहारा
सिताब्जमालेव विभाति तुङ्गा ॥ ८ ॥

दुराधिरोहा गिरयः समन्ता-
द्यस्य स्थिता लोकसृजा विधात्रा ।
साला इवाभान्ति कृता निरोद्धुं
पुण्याश्रमस्यास्य कलिप्रवेशम् ॥ ९ ॥

यत्क्षेत्रमध्यस्थितचारुशैलो
विचित्रनानाकुसुमो विभाति ।
समग्रतीर्थाधिपतित्वचिह्न-
प्रभूतरत्नाढ्यकिरीटकल्पः ॥ १० ॥

श्रीदक्षिणाम्नायमठो पि यस्मि-
न्सुधांशुगौराश्मचितो मनोज्ञः ।
यात्रार्थिदुर्ग्राह्यविसृष्टतुङ्गा
स्नानोत्थपुण्यप्रचयोच्चयः किम् ॥ ११ ॥

द्विजोपघातोऽपि कठोरभक्ष्ये
संदृश्यते यत्र न लेशतोऽपि ।
तद्वर्णसाङ्कर्यमपि प्रकामं
बालाक्षरेष्वेव न यत्र किञ्चित् ॥ १२ ॥

आसाद्य तं शृङ्गगिरिं स विद्या-
तीर्थं गुरुं भक्तियुतो ववन्दे ।
अन्तःस्थितं सत्त्वगुणप्रकर्षं
बहिः किरन्तं स्मितकैतवेन ॥ १३ ॥

निगद्य तस्मै यतिकुञ्जराय
तपोविधानं च वरं च देव्याः ।
निवेदयामास च दीक्षया मा-
मनुग्रहीतुं त्वमिहार्हसीति ॥ १४ ॥

तन्माधवोदीरितवाक्प्रपञ्चम्
निशम्य हृष्टो यतिनां वरेण्यः ।

---

१२) **द्विजोपघातः** १ ब्राह्मणानां हिंसा, २ दन्तभङ्गः "दन्तविप्राण्डजा द्विजा" इत्यमरः ।
वर्णसाङ्कर्यम् = १ ब्राह्मणादि वर्णानामव्यवस्थितिः ।
२ अक्षराणां मिथो व्यामिश्रणम् ।

प्रशस्य भूयोऽपि गुणांस्तदीया-
न्दीक्षाप्रदानाय मुदानुमेने ॥ १५ ॥

जग्राह तस्मात्परमाद्यतीशा-
त्संन्यासदीक्षां विधिवत्स वर्णी ।
शुभे दिने कल्पितपूर्वकृत्यः
सद्धर्मसंरक्षणबद्धदीक्षः ॥ १६ ॥

तेनाथ दण्डे विहिते तदानीं
दुष्टात्मशिक्षाविधिकालदण्डे ।
क्षणेन खड्गा जगलुर्मदान्धै-
र्धृताः करेभ्यः स्वयमेव शीघ्रम् ॥ १७ ॥

दीक्षामेवं यतिकुलपतिर्हृद्यविद्यादितीर्थ-
स्तस्मै दत्वाखिलमपि पुनःसम्प्रदायं निरूप्य ।
नाम्ना चक्रे निगमनिचयाभिज्ञमेनं स्वशिष्यम्
विद्यारण्यं सुगुणभरितं वीक्ष्य हृष्टान्तरङ्गः ॥ १८ ॥

इत्थं तेन यतीश्वरेण विधिवत्संप्राप्ततुर्याश्रमः
विद्यारण्यमहामुनिः प्रमुदितो नत्वांघ्रियुग्मं गुरोः ।

---

१५) यतिनामिति = यतिन् शब्दस्य नान्तस्य षष्ठीवहुचनम् ।

कर्तव्यानि विचिन्तयन्स्वमनसा धर्मस्य रक्षाविधौ
प्रस्थायाथ बहूनटंश्च विषयान्प्रायात्स्वदेशं पुनः ॥ १९ ॥

तत्रोपासितसन्निधिस्सगणनातीतैर्यतीनां वरः
शिष्यैर्दिव्यमहोपदेशमुदितस्तीर्थानि पश्यन्मुदा ।
दर्शं दर्शमरिप्रपीडितधरां चेत्खिद्यमानो भृशम्
कर्तव्ये मृगयन्नयं सुसमयं कालं तदा नीतवान् ॥ २० ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां संन्यासो नाम सप्तमस्तरङ्गः ॥

॥ अथाष्टमस्तरङ्गः ॥

तत्रान्तरे संयमिसार्वभौमो
यात्राप्रसङ्गेन समाजगाम ।
काम्पिल्यकाख्यां प्रथितां कदाचि-
त्पुरीं सुशीलाश्रितपौरजुष्टाम् ॥ १ ॥

यत्राविरास्ते भगवान्पुरारिः
श्रीसोमनाथाधिपलिङ्गरूपः ।
तन्मन्दिरं प्राप पुरोपकण्ठे
प्रत्नं पवित्रं प्रथितं प्रशान्तम् ॥ २ ॥

स्नात्वा समभ्यर्च्य स सोमनाथम्
शिष्योपनीतैर्विविधैः प्रसूनैः ।
छात्रोपदेशैकपरः सुशान्तो
देवालये तत्र स मोदते स्म ॥ ३ ॥

तदात्व एवायत भीमकाया-
स्तमोगुणाधारितमर्त्यरूपाः ।
समाययुर्मार्गवशेन योधा
दिल्लीशितुर्म्लेच्छनृपालकस्य ॥ ४ ॥

पाखण्डभूपालकशासनेन
निषूदनाय प्रसभं प्रवृत्तः ।
सुवैदिकाचारपरप्रजानां
दैतेयमुख्या इव घोररूपाः ॥ ५ ॥

पतिव्रतामानविलुण्ठनोत्का
निषूदयन्तः पथि धैनुकानि ।
दैवानि गेहानि विनाशयन्तो
बलाद्धरन्तो वसु मानवानाम् ॥ ६ ॥

येत्वानगुन्दाख्यपुरस्य नाथं
निहत्य दग्ध्वा च पुरं तदीयम् ।
यान्ति स्म मत्ताः कटुसिंहनादैः
सम्पूरयन्तः पृथिवीं दिवं च ॥ ७ ॥

---

५) **पाखण्डः** = सनातनधर्मध्वंसकः; म्लेञ्च्छः ।

वैदिकाचारः = वेदसतम्मसम्प्रदायः, सनातन धर्मः ।

६) **धैनुकानि** = गवां समूहान् "वत्सधेन्वोर्वात्सकधैनुके", इत्यमरः "अचित्तहस्तिधेनोष्ठक्" इति ठक्प्रत्यये कृते "इसुसुक्तांतात्क" इति ठस्य कादेशे धैनुकमितिसिद्धम् ।

निरीक्ष्य तानञ्जनपर्वताभा-
न्काम्पिल्य-पौरा नितरां प्रभीताः ।
विदुद्रुवुः सत्वरभात्तवेगाः
सन्दष्टशार्दूलगणा इवैणाः ॥ ८ ॥

निरीक्ष्य देवायतनं सुतुङ्गं
धर्मद्रुहो मत्तगजा इवाग्रे ।
फलद्रुमारादभिदुद्रुवुस्ते
तद्भञ्जनोत्साहभरप्रपूर्णाः ॥ ९ ॥

यतीन्द्रशिष्याश्च निशम्य भीमं
कोलाहलं वीक्ष्य च दुर्भटान्स्तान् ।
भयात्तगन्धाः सहसा कवाटं
पिधाय कोणेषु विलीय तस्थुः ॥ १० ॥

अन्तर्निलीनानवबुध्य कांश्चि-
द्विलोक्य सद्यः पिहितं कवाटम् ।
विचुक्रशुस्ते यमकिङ्कराभाः
क्रुद्धाट्टहासं कलयाम्बभूवुः ॥ ११ ॥

---

९) आरात्= समीपं ‘ आराद्दूरसमीपयोः ’ इत्यमरः ।
१०) भयात्तगंधाः = भयपीडिता इत्यर्थः ।

विशाम निर्भिद्य कवाटमेत-
  द्धनामचान्तः प्रविलीनमूढान् ।
संचूर्णयामालयमीश्वरस्ये-
  त्याघोषिषुस्तेऽतिरुषा तुरुष्काः ॥ १२ ॥

ते मत्तयोधास्तरसा निजघ्नु-
  र्दृढार्गलं देवगृहाररं तं ।
महीध्रकूटाभशिलासहस्रै-
  रंतःस्थितानां च सहैव धृत्या ॥ १३ ॥

सद्यः प्रतीकारकथाविहीनं
  समागतं विप्लवमाकलय्य ।
चिन्तापगापूरनिमग्नचित्तो
  धीरः प्रकृत्यापि यतीश्वरोऽभूत् ॥ १४ ॥

क्षणेन तुर्याश्रमिसार्वभौमो
  धृतिं समालम्ब्य रुषारुणाक्षः ।
आलम्ब्य मौनं प्रयतो महात्मा
  जजाप मृत्युञ्जयदिव्यमन्त्रम् ॥ १५ ॥

---

१५) मृत्युंजयदिव्यमंत्रः = अपमृत्युनिवारको वैदिको मंत्रविशेषः ।

अन्तःप्रवेशाय यदायतन्त
निर्भिद्य देवायतनाररं ते ।
तदात्व एवापततां कुतश्चि-
द्वीरौ युवानौ धृतशस्त्रभीमौ ॥ १६ ॥

स्ववीरनादैः सपदि प्रयुक्तैः
विदारयन्तौ हृदयानि तेषाम् ।
निशातनिस्त्रिंशनिकृत्ततत्क
परम्पराभिर्भुवमर्चयन्तौ ॥ १७ ॥

तन्म्लेञ्छयूथं च तदा प्रपेदे
दशां सुरारातिकुलानुभूताम् ।
रघुप्रवीरेण सहानुजेन
प्राग्जातरोषेण कृतामनल्पाम् ॥ १८ ॥

---

१६) अररं - कवाटं = ' कवाटमररं तुल्ये ' इत्यमरः ।

१७) निकृत्ततत्त्त्कपरम्पराभिः = कं = शिरः 'कं शिरोम्बुनोः' इत्यमरः ।

१८) रामलक्ष्मणाभ्यां यथा राक्षसा विध्वंसितास्तथा आगंतुकाभ्यां युवभ्यां म्लेञ्छा विध्वंसिता इत्यर्थः ।
मंक्षु = सपदि ' द्राङ् मंक्षु सपदि द्रुते ' इत्यमरः ।
'तरक्षुस्तु मृगादने' इत्यमरः ।

मृगौघसंविष्टतरक्षुलीलां
विडम्बयन्तौ पुरुषौ निरीक्ष्य ।
ते चण्डयोधाः सुसमृद्धकोपाः
मंक्षु प्रवृत्ताः प्रतिसंविधाने ॥ १९ ॥

असंस्तुतं घोषमुपाविशंतं
निरीक्ष्य सर्वे युगपद्यथैव
कौलेयकास्तद्वदिमौ तुरुष्काः
संवेष्टयन्ति स्म विनर्दनेन ॥ २० ॥

तयोश्च तेषां च बभूव जन्यं
यत्राजिरङ्गाङ्गणकाननस्य ।
कृपाणसंघट्टनविस्फुलिङ्गाः
दावाग्निशङ्कां जनयाम्बभूवुः ॥ २१ ॥

---

१९) **तरक्षुः** =कुक्कुराकृतिः कृष्णरेखाचित्रितमृगविशेषः 'शिवंगि' इति भाषायाम् ।

२०) **घोषमुपाविशंतं असंस्तुतं** = अपरिचितं, पुरुषमिति यावत् कौलेयकाः शुनकाः, 'कौलेयकः सारमेयः' इत्यमरः ।

तां दैविकीं संघटनां मुनीन्द्रो
नेत्रातिथीकृत्य सुविस्मयःसन् ।
शिवाय यूनोः प्रकृते समीके
पपाठ सौरं हृदयं तदानीम् ॥ २२ ॥

बाहुस्फुरच्चण्डकृपाणकाभ्यां
ताभ्यां सुदुर्धर्षपराक्रमाभ्याम् ।
निकृत्तशीर्षा यवनेषु केचि-
त्केचिद्बभूवुर्विनिकृत्तहस्ताः ॥ २३ ॥

ततः क्षणादेव हतावशिष्टा-
स्तेजस्तयोस्सोढुमपारयन्तः ।
स्वप्राणसंरक्षणमात्रतृप्ता-
स्ते कांदिशीका यवना बभूवुः ॥ २४ ॥

जयप्रसिद्ध्यै सुभटस्य सङ्ख्ये
महच्च सत्त्वं करकौशलञ्च ।
धर्मस्य साह्यं प्रकरोति नूनं
प्रयोजका नैव हि तत्र संख्या ॥ २५ ॥

---

२२) **सौरं हृदयं** = आदित्यहृदयं नाम महामंत्रम् । रावणेन सह युध्यते रामाय अगस्त्यो महामुनिः आदित्यहृदयं उपादिदेशेति रामायणकथा ।

२४) **कांदिशीकाः** = भयद्रुताः 'कांदिशीको भयद्रुतः' इत्यमरः ।

तदापयाते परिपन्थियूथे
　　प्रसन्नचित्तौ सुभगौ प्रवीरौ ।
सम्प्राप्तयोगीश्वरसन्निधानौ
　　प्रणेमतुस्तत्पदकंजयुग्मम्　　॥ २६ ॥

पादानतावक्षतविग्रहौ तौ
　　जयश्रियालिङ्गितबाहुदण्डौ ।
आश्चर्यविस्फारितनेत्रयुग्मः
　　कृत्वाशिषः प्राह स मस्करीन्द्रः　　॥ २७ ॥

वत्सौ युवां कौ सुमहानुभावौ
　　कथं हठादत्र समागतौ स्थः ।
वदन्ति वां राजकुलप्रसूतिं
　　विस्पष्टचिह्नानि पराक्रमश्च　　॥ २८ ॥

इति ब्रुवाणे यमिसार्वभौमे
　　ज्यायांस्तयोः प्राह नतोत्तमाङ्गः ।
बद्धाञ्जलिस्सान्विनयाभिरामो
　　गुणो वपुष्मानिव शंक्यमानः　　॥ २९ ॥

श्रीसङ्गमो नाम धराधिन.थो
　　वसुन्धरां देवगिरौ प्रशास्ति ।

शशाङ्कवंशाम्बुधिपूर्णचन्द्रो
निसर्गशत्रुर्यवनाधिपानाम् ॥ ३० ॥

हक्काभिधानोऽस्मि तदीयपुत्रो
ज्येष्ठोऽनुजोऽसौ मम बुक्कनामा ।
यः सर्वदा मामनुवर्तमानो
रामं यथा दाशरथिस्तृतीयः ॥ ३१ ॥

धीरः प्रकृत्यापि नृपः पिता मे ।
दस्यूनसंख्यान्प्रबलान्विजेतुम् ॥
अपारयन्खिन्नमनास्सदास्ते ।
मित्रादिसंपद्गुणहीन एकः ॥ ३२ ॥

बंदीकृतं काकतिभूमिपालम्
बल्लालभूपश्च हतं निशम्य ।
तस्याभिमानैकधनस्य राज्ञः
सन्तापभारो द्विगुणीबभूव ॥ ३३ ॥

दन्दह्यमानेन हृदा नृपालः
श्रीवासुदेवं कुलदैवतं नः ।
आराधयामास चिरं स येन
प्रतिश्रुता विश्वकुटुंबरक्षा ॥ ३४ ॥

राज्ञः शयानस्य निशावसाने
पूर्वेद्युरूचे भगवान्मुकुंदः ।
संदर्श्य दिव्यां स्वतनुं कृपालुः
स्मितेन संदर्शितहृत्प्रसादः ॥ ३५ ॥

अलं शुचा वत्स धृतिं लभस्व
त्रातुं जगद्दस्युगणाभिभूतम् ।
कालः प्रवृत्तः कथयामि तस्मा-
द्यदद्य कार्यं कुरु तच्चमाशु ॥ ३६ ॥

दिव्यानुभावो यतिनां वरेण्य-
स्सद्धर्मसंस्थापनबद्धदीक्षः ।
अद्याधितिष्ठत्यसमानतेजाः
काम्पिल्यकं शिष्यजनैः समेतः ॥ ३७ ॥

सहानुजं ज्येष्ठसुतं त्वदीयं
समर्पयास्मै यतिसत्तमाय ।
विनैव शङ्कामिति देवदेवः
संदिश्य सद्यः स तिरोहितोऽभूत् ॥ ३८ ॥

---

३८) **अनुभावः** = महिमा; प्रभावः 'अनुभावः प्रभावे च' इत्यमरः ।

तिरोहिते चैवमुदीर्य देवे
प्रबुध्य भूयश्चकितो दिनेशः ।
पीयूषधारामधुरां च वाणीं
रूपं स्मरन्दिव्यमभूत्प्रहृष्टः ॥ ३९ ॥

संमंत्र्य शीघ्रं सचिवाग्रगण्यै-
र्जगाद मां संप्रति भूमिपालः ।
वत्साज्ञया नः कुलदेवताया
दत्तो यतीन्द्राय सहानुजोऽसि ॥ ४० ॥

अद्यैव तद्गच्छ स यत्र मौनी
काम्पिल्यकं नाम पुरं सशस्त्रः ।
वशे स्थितस्तस्य मुनेः प्रकामम्
निर्जित्य शत्रून्विजयी भवेति ॥ ४१ ॥

मुदा तदाज्ञां शिरसाभिनंद्य
नत्वा प्रयास्यन्चरणौ तदीयौ ।
भ्रात्रानुयात्रोऽत्र पुरोपकण्ठे
सोपप्लवं देवगृहं व्यपश्यम् ॥ ४२ ॥

---

४२) उपकण्ठे = समीपे " उपकंठांतिकाभ्यर्णाभ्यग्राऽप्यभितोऽभ्यम् " इत्यमरः । सोपप्लवं विपदाकुलितं ।

अद्यास्मि धन्यो भगवत्पदाब्ज-
विलोकनादेव मुनिप्रकाण्ड ।
इमं जनं शाधि कृपापयोधे
शिष्यं च भक्तं परिगृह्य सद्यः ॥ ४३ ॥

आस्तां वचस्तच्छिशुपालशत्रो-
राज्ञा च सा तिष्ठतु मे पितुश्च ।
संदर्शनादेव महात्मनस्ते
जातोऽयमात्मा विवशस्स्वयं मे ॥ ४४ ॥

इत्थं तदीयां विनयोपपन्नाम्
निशम्य वाचां सरणिं यतीन्द्रः ।
तां दैविकीं सङ्घटनां च पश्य-
न्नासीत्प्रमोदाचलतुङ्गकूटे ॥ ४५ ॥

तं प्राह जैवातृक विक्रमं ते
प्रोल्लङ्घितोच्चण्डमृगेन्द्रलीलम् ।
शीलं च शीतांशुकराभिरामं
विलोक्य मे मोदमुपैति चेतः ॥ ४६ ॥

---

४६) जैवातृक = आयुष्मन् 'जैवातृकः स्यादायुष्मान्' इत्यमरः ।

संपन्न एवाद्य महोद्यमोऽयं
कर्मक्षमं त्वामधिगम्य शिष्यम् ।
भैषज्यचिन्तावसरे सुदैवा-
न्मया तु संजीवनमेव लब्धम् ॥ ४७ ॥
अद्यैव पाखण्डगणो विनष्टो
दृढं प्रतिष्ठापित एव धर्मः ।
विश्वंभराहृत्कमलं प्रफुल्लम्
अनुष्ठितश्चाद्य गुरोर्निदेशः ॥ ४८ ॥
महोद्यमाब्धिं मम संतितीर्षो-
र्महातरिं त्वामवलंब्य तूर्णम् ।
निगृह्यमाणानि सुनीतिजालै-
स्तुरुष्कयादांसि कियन्ति वत्स ॥ ४९ ॥
विजेष्यसे त्वं निखिलानराती-
न्मनीतिमार्गेण चरन्कुमार
भूत्वा च कर्णाटकसार्मभौमो
राजन्वतीमब्धिवसं तनोषि ॥ ५० ॥

---

४७) कर्मक्षमं = कार्यसमर्थं ।
४९) तरिं = नावं "नौस्तरणिस्तरिः" इत्यमरः ।
यादांसि = जलजन्तवः "यादांसि जलजन्तवः" इत्यमरः ।
५०) अब्धिवसं = समुद्रवसनां, धरामिति यावत् । अब्धि वस्ते, परिधत्ते इत्यब्धिवः, तां ।

इत्थं भूयः प्रमुदितमना वाग्भिरानंदयित्वा ।
विद्यारण्यः परमयतिराड्सङ्गमेशात्मजातं ॥
विश्राम्येति प्रणतशिरसं तं विसृज्य प्रसक्तम् ।
कर्तव्यांशं रहसि कलयन्व्यग्रचित्तो बभूव ॥ ५१ ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां हक्कदेवसमागमो नामाष्टमस्तरङ्गः ॥

---

५१) **विश्राम्य** = " श्रमु तपसि खेदे च " इति धोतो लोंटो मध्यमपुरुषैकवचनं ।

॥ अथ नवमस्तरङ्गः ॥

विचिन्त्य सर्वं हृदि कार्यजातं
वृन्दारकाचार्यसमानबुद्धिः ।
ततः परेद्युर्विनयोपपन्नम्
तं हक्कदेवं निजगाद योगी ॥ १ ॥

कर्णाटका जानपदा धरण्याम्
प्रचंडदोर्दंडबलप्रसिद्धाः ।
विनैव ते संप्रति हीनसत्त्वाः
संयोजकेन प्रबलेन नेत्रा ॥ २ ॥

तेषामिदानीं प्रथमं विधेया
प्रयत्नतः संघटना यया हि ।
संवर्धितोत्साहमहाप्रतापा
हन्युः क्षणादेव सपत्नसेनाम् ॥ ३ ॥

---

१) वृन्दारकाचार्यः = देवगुरुर्बृहस्पत्याचार्यः ।

३) सपत्नसेनां = शत्रुसेनाम् ।

मद्बोधसूत्रग्रथिताः प्रवीराः
संप्राप्तसंघातबलोच्चयास्ते ।
त्वां प्राप्य नेतारमरीन्समीके
तृणाय मत्वा विजयं लभंते ॥ ४ ॥

इतीरयित्वाखिलतंत्रवेदी
यतिप्रकांडः प्रयताय तस्मै ।
तां दण्डनीतिं नृपभव्यमूलाम्
उपादिशद्बाहुजतल्लजाय ॥ ५ ॥

राज्ञो गुणान्मंत्रिगुणान्प्रजाना-
मावर्जनोपायविधिं तथैव ।
सेनासुहृत्कोशसमृद्धिमार्गं
संधेयभूपालकलक्षणं च ॥ ६ ॥

मित्रप्रलाभं च सुहृद्विभेदं
संधिक्रमं विग्रहकर्मरीतिम् ।
एतानि चान्यानि च विस्तरेण
प्रबोधयामास नृपात्मजं तम् ॥ ७ ॥

---

४) ‘ तृणायमन्यते ’ ‘ मन्यकर्मणि ’ इत्यादिना चतुर्थी ।

५) बाहुजतल्लजः = क्षत्रियश्रेष्ठः ।

विग्रहकर्मरीतिम् = युद्धकार्यविधानम् ‘ समरानीकरणाः कलहविग्रहौ ’ इत्यमरः ।

अन्तःस्थितोत्साहकृपीटयोने-
गुरुप्रबोधानलदीपितस्य ।
बहिर्गता दीप्तिरिवास्य वक्त्रे
छविर्बभौ कापि तदातिमात्रम् ॥ ८ ॥

भूयोऽपि तं प्राह कुशाग्रधीः स
श्रुतं मया शिष्यजनादिदानीम् ।
तदानगोंदीनगरं तुरुष्कै-
रराजकत्वं गमितं मदांधैः ॥ ९ ॥

हतं नृपं शत्रुकृतोपरोधं
पुरं च संवीक्ष्य हतावशिष्टः ।
समाविशद्योधगणो भियेति
पंपाटवीमध्यमिलाधिपस्य ॥ १० ॥

भ्रातृद्वितीयस्त्वमितोऽटवीं तां
संप्राप्य सर्वानपि सैनिकांस्तान् ।
देशेऽस्मदीये ममतां धृतिं च
वचोभिरुत्पाद्य वशीकुरुष्व ॥ ११ ॥

स्वगेहविभ्रंशनखिद्यमानाः
कांतारसंचारगतप्रमोदाः ।
सुखेन ते तेऽनुचराभवेयु-
र्निरीक्ष्य यूथाधिपतिं यथेभाः ॥ १२ ॥

संशप्तकांस्तान्प्रविधाय यत्ना-
　　त्तैरानगोंदीनगरं निरुध्य ।
निहत्य तद्राक्षिविपक्षसैन्यं
　　जयेन साकं नगरं लभस्व　　　　॥ १३ ॥

ओंकाररूपोऽस्तु जयस्तवायं
　　स्वराज्यसंस्थापनवेदपाठे ।
तथोत्तरे कर्मणि संगतोऽहं
　　तव प्रवृत्तिं प्रतिपालयामि　　　　॥ १४ ॥

इति गुरुवचनं तत्सादरं हक्कनामा ।
　　स्वशिरसि विदधानः संप्रणम्याथ भक्त्या ॥
गुरुचरणयुगं तं सोमनाथं च देवं ।
　　प्रमुदितहृदयस्सन्सानुजः संप्रतस्थे　　　　॥ १५ ॥

तस्मिन्संगमभूपतीन्द्रतनये जैत्रप्रयाणोन्मुखे ।
　　तत्सव्येतरबाहुना सहमुनेर्नेत्रं च सव्येतरम् ।
पस्पंदे समुपाजगाम सहसा साकं सहस्रांशुना ।
　　विद्यारण्ययतीश्वरस्य नितरां चित्तं प्रसादं तदा　　　　॥ १६ ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां हक्कदेवोपदेशो नाम नवमस्तरङ्गः ॥

---

१३) संशप्तकान् = प्रतिज्ञाय युद्धादनिवर्तिनो योधान् ''संशप्तकास्तु समयात्संग्रामादनिवर्तिनः '' इत्यमरः ।

॥ अथ दशमस्तरङ्गः ॥

गते कुमारे विजयाय योगी
तुरुष्कशंकाविलमंतरंगम् ।
स्वसूक्तितोयप्रसरैर्जनानाम्
संक्षालनाय स्वमतिं व्यधत्त ॥ १ ॥

नानापुरीर्ग्रामगणांश्च गच्छन्
शिष्यैः समं स्वैः पटुभिर्वचोभिः ।
उपादिशज्ज्ञानपदानुपेतान्
स्वकीयवाग्जालगृहीतचित्तान् ॥ २ ॥

प्रसन्नगंभीरवचोविलासो
निसर्गशांताकृतिरस्य भव्या ।
तुर्याश्रमित्वं च जनस्य चित्तं
तदात्वहंपूर्विकया प्रजहुः ॥ ३ ॥

जनास्तदानीं शतशश्च केचि-
त्सहस्रशः केचन लक्षशोऽन्ये ।
निपीय तद्बोधसुधां कृतार्था
देवा इवाभुत्सत ते हृदि स्वम् ॥ ४ ॥

वाचां पतेस्तस्य वदामि वाचां
सारं तु संक्षिप्य सतां सुखाय ।
विशेषतो वर्णयितुं प्रवृत्तः
को वा कविः कौ कुशली कृती स्यात् ॥५॥

धीरो धरायां हि पुमानधीरः
पुंवेषधृक्स्त्रीति विहस्यमानः ।
नरैरशेषैरभिभूयमानः
क्षोदिष्ठतां यास्यति भूतलेऽस्मिन् ॥ ६ ॥

महान्तमापज्जलधिं तरीतुं
सुधीरता नौरिव मानवानाम् ।
तमेतमर्थं भगवान्मुकुंदः
प्रोवाच खिन्नाय पुरार्जुनाय ॥ ७ ॥

अनैकमत्याख्यमहागदेन
प्रपीडितो भारतमण्डलेऽस्मिन् ।
दिने दिने याति नरोऽतिमात्रम्
सत्त्वापकर्षं स्वविनाशहेतुम् ॥ ८ ॥

---

६) क्षोदिष्ठतां = अत्यंतक्षुद्रताम् ।

यच्छत्रुनिर्मूलनबीजभूतं
यद्भूतिसंपादनमुख्यतन्त्रम् ।
तदैकमत्याभिधलोहयंत्रम्
गृह्णन्प्रभिद्यादसुहृद्बलानि ॥ ९ ॥

निगद्यते या जनतांगनाया
विचक्षणैर्मंगलसूत्रिकेति ।
सा देशभक्तिः कुशलाय धार्या
विहाय यां सा विधवेव शोच्या ॥ १० ॥

एको हि नेता कुशली समर्थो
नीवृद्विभूत्यै सकलप्रजाभिः ।
सदाभिगम्यो बहुनायकत्वं
अनायकत्वं च जनान्हिनस्ति ॥ ११ ॥

मया हि कर्णाटकमण्डलेऽस्मि-
न्साम्राज्यमेकं सुदृढं सुधर्म्यम् ।
संस्थाप्यते वः कुशलाय यस्मिन्
शांतिं लभन्ते निखिलप्रजाश्च ॥ १२ ॥

---

११) नीवृत् = जनपदम् " नीवृज्जनपदौ " इत्यमरः ।

जैवातृकः सोमकुलांबुराशे-
जैवातृको हक्कनृपो हि सम्राट् ।
स एव नेता सकलाभिगम्यो
यथा महेन्द्रो निखिलैर्मरुद्भिः ॥ १३ ॥

आम्नायसारमिव तन्मुनिदिव्यबोधं
सर्वे जनाः स्वहृदयेषु समभ्यनंदन् ।
तं मेनिरे परशिवं भुवनावतीर्णम्
हूणाभिभूतजनतापरिपालनाय ॥ १४ ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां जनतोपदेशो नाम दशमस्तरङ्गः ॥

---

१३) जैवातृकः = १. आयुष्मान् ।
२. चन्द्रः "जैवातृकः शशाङ्कोऽपि" इत्यमरः ।

॥ अथैकादशस्तरङ्गः ॥

अत्रांतरेऽसौ यतिसार्वभौमः
श्रुत्वाऽऽनगोंदीग्रहणं प्रहृष्टः ।
अनीकिनीसंग्रहणादिकार्ये
संजाततर्षो नितरां बभूव ॥ १ ॥

स सायणं शिष्यजनोपनीतं
जनोपदेशाय नियुज्य तूर्णम् ।
जयिष्णुभूपालसुतं दिदृक्षु-
स्तदानगोंदीनगरं प्रतस्थे ॥ २ ॥

यथा चकोरस्तृषितः शशाङ्कं
निरीक्षमाणः स्वगुरुं कुमारः ।
तद्दर्शनोद्यत्प्रमदोन्नतिस्स-
न्ननाम तत्पादपयोजयुग्मे ॥ ३ ॥

सुखोपविष्टो विजने तपस्वी
तमूचिवान्क्षत्रियवंशकेतुम् ।
दिष्टयाद्य पश्यामि गृहीतदुर्गं
स्थाने जयस्साहसिकोपलब्धः ॥ ४ ॥

---

१) अनीकिनी=सैन्यम् "ध्वजिनीवाहिनी सेना पृतनाऽनीकिनी चमूः" इत्यमरः ।

तथापि संचिंत्य बलोद्धतारी-
न्मनो मदीयं न हि शांतिमेति ।
च्युतं स्वहस्तान्नगरं स्वचारैः
क्रुद्धो भवेद्भूणपतिर्निशम्य ॥ ५ ॥

पदे पदे प्राप्तजयः सुदक्षः
सक्रोधनोऽकुंठितसैन्यशक्तिः ।
अदृष्टपूर्वं सहते कथं वा
पराभवं क्षत्रियबालकेन ॥ ६ ॥

फणीव पादाहतिजातरोषः
स प्रेषयत्येव वरूथिनीं स्वाम् ।
अस्मत्समुन्मूलनबद्धकक्षः
संख्यातिगोच्चंडभटातिभीमाम् ॥ ७ ॥

सेनाल्पसंख्याकभटास्मदीया
बलं तदीयं न निरोद्धुमीष्टे ।
न सन्ति दुर्गाण्यपि यानि भूपाः
संश्रित्य जय्या न भवंति जातु ॥ ८ ॥

---

६) **क्रोधनः** = कोपशीलः "क्रोधनोऽमर्षणःकोपी" इत्यमरः ।

वरूथिनीसंग्रहणादितंत्रं
विर्त्तैकमूलं विजिगीषुभूपः ।
तत्संचयाय प्रयतेत तस्मा-
ज्ज्ञानार्जनायेव मुमुक्षुरग्रे ॥ ९ ॥

वरप्रसादाज्जगदम्बिकायाः
कुर्यामिदानीं धनदाधिकं त्वां ।
क्रोशद्वयव्याप्तधरातलेऽस्मि-
न्देवी च सा वर्षति कांचनानि ॥ १० ॥

स्वस्वालयाग्रे पतितानि पौरा
गृह्णन्तु कामं पतितानि यानि ।
अन्यत्र शृंगाटकराजवीथी-
केदारमार्गादिषु तानि राज्ञे ॥ ११ ॥

सत्यान्वितैः पौरजनैस्समग्रैः
संगृह्य संगृह्य सुवर्णखंडा-
न्सर्वत्र भूमौ पतितान्प्रयत्ना-
त्कोशस्त्वदीयः परिपूरणीयः ॥ १२ ॥

---

९) **वरूथिनी** = सैन्यम् "वरूथिनी बलं सैन्यम्" इत्यमरः ।
विजिगीषुः = विजेतुमिच्छुः ।
११) **शृङ्गाटकं** = चतुष्पथम् "शृङ्गाटकचतुष्पथे" इत्यमरः ।

सहोदरस्ते विनियोजनीयः
कोषाधिकारे सुभटा अमी च ।
मदीयशिष्यैः सह नागराणां
कुर्वंतु साह्यं वसुसंग्रहेऽस्मिन् ॥ १३ ॥

अयं भवान्याः परमप्रसादो
यदा तु घंटा महता रवेण ।
निवेद्यते तावदशेषपौरा
नेत्रातिथीकृत्य मुदं प्रयांतु ॥ १४ ॥

तथेति हक्कः प्रतिगृह्य वाचं
तामद्भुतां विस्मयपूरमग्नः ।
जवाद्यथावत्प्रविधाय कार्यं
निवेदयामास मुनीश्वराय ॥ १५ ॥

स्नात्वा महात्मा तपसां निधिः स
ततः शुचिस्सन्नपिधाय नेत्रे ।
एकाग्रचित्तो विहितासनस्स-
न्दध्यौ मुहूर्तं भुवनेश्वरीं ताम् ॥ १६ ॥

---

१३) **कोशः** = धननिक्षेपस्थानम् ।

१६) **अपिधाय** = निमील्य ।

ततः क्षणादेव नभःसमंता-
द्बभूव कार्तस्वरवर्णशोभि ।
फलोन्मुखं वीक्ष्य वरं तदानीं
शिष्याश्च घंटारवमावितेनुः ॥ १७ ॥

तदांबराद्धेममयी प्रवृष्टिः
महाद्भुता साऽश्रुतदृष्टपूर्वा ।
पपात भूमौ सह पुष्पवृष्ट्या
गीर्वाणहस्तच्युतया मुहूर्तम् ॥ १८ ॥

परस्पराघृष्टसुवर्णखण्डैः
समुत्थिते तारमहानिनादे ।
तिरोहितोऽभूद्दिविषत्प्रयुक्तो
भेरीनिनादस्सुमहांस्तदानीम् ॥ १९ ॥

सहैव गीर्वाणकरप्रमुक्तैः
सुगंधिले दिग्वलये सुपुष्पैः ।
सुवर्णखण्डेषु सुगन्धिभावं
संभाव्य सर्वे चकिता बभूवुः ॥ २० ॥

---

१७) कार्तस्वरं = सुवर्णम् " रुक्मं कार्तस्वरं जांबूनदमष्टापदो-ऽस्त्रियाम् " इत्यमरः ।

कठोरचामीकरखंडपातैः
संप्राप्तबाधैः पुरवासिवर्गैः ।
खेदोऽपि चित्ते गणितो न किंचि-
द्विक्रोशितं मोदभरातिरेकात् ॥ २१ ॥

क्षणेन भूमिं सुरवर्त्मपश्चा-
त्क्षणेन खं क्षोणितलं ततश्च ।
पर्यायवृत्त्या प्रविलोकयंतः
स्वकंधराणां श्रममादधुस्ते ॥ २२ ॥

व्यादाय वक्त्रं प्रविलोक्य कश्चि-
त्सुवर्णखण्डेषु पतत्सुवक्त्रे ।
उद्गीर्य हा हेति रुदञ्जनानां
बटुः प्रहासं जनयांबभूव ॥ २३ ॥

अश्रांतजांबूनदवृष्टिपातै-
स्तदानगोन्दीनगरप्रदेशे ।
क्रोशद्वयव्यायतभूमिभागे
नान्यत्तदानीं ददृशे मुहूर्तम् ॥ २४ ॥

---

२४) जाम्बूनदं = सुवर्णम् ।

हेमप्रभाभिर्विदिशो दिशश्च
व्याप्ता जगत्पीतमिवाबभासे
बभूव संहृष्टजनप्रयुक्तैः
कोलाहलैः शब्दमयश्च लोकः ॥ २५ ॥

शांतिं गतायां तपनीयवृष्टयां
सर्वे जना हक्कनृपालकाज्ञां ।
निधाय चित्ते तपनीयराशी-
न्संगृह्य तस्मै प्रददुः प्रहृष्टाः ॥ २६ ॥

नैकोऽपि तस्मिन्नगरे नृपाज्ञा
मुल्लङ्घयामास यतश्च सर्वे ।
महामुनौ भक्तिभरप्रपूर्णाः
सर्वस्वदानेऽपि समुत्सुकास्ते ॥ २७ ॥

निःस्वीकृता जानपदास्तुरुष्कै-
र्हठात्समालभ्य सुवर्णवृष्टिम् ।
हृष्टाश्च पुष्टाश्च तदाबभूवु-
रवग्रहे वृष्टिमिवोपलभ्य ॥ २८ ॥

---

२८) अवग्रहे = अनावृष्टौ "वृष्टिर्वर्षं तद्विघाते वग्राहावग्रहौ समौ" इत्यमरः ।

सुवर्णराशीन्समुपार्जितांस्ता-
न्स्वमंदिरेषु प्रमदप्रकर्षम् ।
चित्ते च संपूरयितुं समर्थो
नासीत्कथंचित्स नृपात्मजोऽपि ॥ २९ ॥

गुरुप्रभावार्जितरुक्मराशिं
नैवातिशेते स्म सुरेषु कोऽपि ।
वार्तापि का क्षुद्रमहीपतीना-
मत्यल्पसौभाग्यवतां तदानीम् ॥ ३० ॥

अनन्यसाधारणमद्य दृष्ट्वा
गुरोः प्रभावं नृपनंदनस्य ।
निरूढमूला हृदयालवाले
सा भक्तिवल्ली बहुधा प्रवृद्धा ॥ ३१ ॥

इत्थं प्रदर्श्य यतिराट् तपसःप्रभावं ।
तोष्टूयमानमहिमाखिलदेवताभिः ॥
पश्यञ्जनांश्च जनपं च समृद्धकामा-
न्संसेवितो नृपसुतेन जगाम हर्षम् ॥ ३२ ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां कनकप्रवृष्टिर्नाम एकादशस्तरङ्गः ॥

---

३०) रुक्मराशिं = सुवर्णसमूहम् ।

॥ अथ द्वादशस्तरङ्गः ॥

सुवर्णसंघातमवाप्तमेवं
राज्यांगसंवर्धनकर्ममार्गे ।
अह्नाय सम्यग्विनियोक्तुकामो
व्यजिज्ञपद्योगिवरं नृपोऽपि ॥ १ ॥

धरापतित्वं किल कंटकेद्धं
स चाप्रबुद्धो नृपतेः कुमारः ।
अनन्यजय्या रिपवो बलाढ्याः
स्वयं स तस्मात्सचिवत्वमाप ॥ २ ॥

महांति दुर्गाणि विनिर्ममे सः
विवर्धयामास वरूथिनीं च ।
क्रमेण कर्णाटमहाचमूः सा
बभावजय्यत्वमुपेत्य भीमा ॥ ३ ॥

भीत्या तुरुष्कप्रभुमाश्रितेभ्यः
कर्णाटदेशीयमहीपतिभ्यः ।
स प्राहिणोद्बुक्कमहाधिराज्यं
प्रीत्यानुमंतुं स्वयमेव लेखान् ॥ ४ ॥

---

१) अह्नाय = द्राक् "अह्नाय द्राङ्मंक्षु सपदि द्रुते" इत्यमरः ।
विनियोक्तुकामः = "तुं काममनसोरपि" इत्यनुस्वारलोपः ।

सुवर्णवृष्टेरधिगम्य वार्तां
विसृत्वरीं तेऽखिलमंडलेशाः ।
महाप्रभावं मुनिपं च बुद्ध्वा
सामंतभावं सहसाधिजग्मुः ॥ ५ ॥

गोदावरीसह्यसुतांतराले
महामुनेरस्य कृते प्रमोदात् ।
जह्यान्भयस्त्रागपि जीवितं स्वं
सोऽन्विष्यमाणोऽपि न दृश्यते स्म ॥ ६ ॥

तुरुष्कभूमीपतिदुर्गपाला
नवोदिते क्षत्रियभूमिपाले ।
प्रदुद्रुवुः क्वापि यथा दिवान्धाः
पूर्वाद्रिमारोहति चंडभानुः ॥ ७ ॥

विनैव जन्यं ववृधेऽस्य राज्यं
दिने दिने प्रीतिभरैर्जनानाम् ।
प्रजानुरागेण नृपो जयी स्या-
ज्जन्यं तु लोकप्रविनाशकं हि ॥ ८ ॥

---

५) **विसृत्वरीं** = सर्वत्रव्याप्ताम् " विसृत्वरो विसृमरः प्रसारी च विसारिणी " इत्यमरः ।

७) **दिवान्धाः** = घूकाः " दिवान्धः कौशिको घूकः इत्यमरः ।

भग्नानि देवायतनानि पूर्वं
सुनिर्मितान्यद्य मुनीश्वरेण ।
पुनः प्रवृत्ता विधयश्च धर्म्या
रथास्समीभूतसुवर्त्मनीव ॥ ९ ॥

यथा पुरा मागधचन्द्रगुप्तः
चाणक्यतः प्राप महासमृद्धिम् ।
तथा मुनींद्राद्यदुवंशकेतुः
सौभाग्यसौधाग्रविहारमाप ॥ १० ॥

अथैकदाऽसौ विजयाय सेना-
माज्ञापयामास शुभे मुहूर्ते ।
सेनाधिपत्ये विनियोज्य बुक्कम्
कुमारदेवप्रतिमं कुमारम् ॥ ११ ॥

असंख्यमातंगतुरंगमाढ्या
धृतायसोरच्छदवीरयोधा ।
ऊर्जस्वलोच्चंडभटातिभीमा
चचाल कर्णाटमहीपसेना ॥ १२ ॥

---

९) धर्म्याः = धर्मादनपेताः ।

१०) चाणक्यः नन्दैः दूरीकृतं तद्दायादं चन्द्रगुप्तं परिगृह्य नन्दान् स्वराजतिप्रभावेण नाशयित्वा चन्द्रगुप्ताय मगधराज्य-मदादितीतिहासः ।

निशातनिस्त्रिंशधनुश्शतघ्नी
 प्रासादि हेतुज्ज्वलघोररूपा ।
क्ष्वेडारवोद्भिन्नदिगंतराला
 पादोत्थधूलीविहितांधकारा ॥ १३ ॥

दिशासु सर्वासु चरन्स बुक्कः
 प्राचीं समारभ्य चमूसमेतः ।
भूपालकात्क्षत्रियगोत्रजाता-
 न्न क्वापि रोधं स समाजगाम ॥ १४ ॥

कदंबपुन्नाटकलिंगगंग
 प्रख्यामहीशा विनतोत्तमांगाः ।
उपायनीकृत्य महार्घभूषा
 रत्नानि संधां स्वयमंग्यकार्षुः ॥ १५ ॥

दिल्लीमहीवल्लभदुर्गपाला
 भुजावलेपेन निरुध्य सेनां ।
केचिद्रणाग्नौ शलभत्वमापुः
 पलायिताः केचन भीतभीताः ॥ १६ ॥

---

१३) क्ष्वेडारवः = सिंहनादः "क्ष्वेडा तु सिंहनादस्यादित्यमरः" ।
१६) शलभत्वं = पतङ्गकीटभावम् ।
 रणाग्नौ शलभत्वमापुः = हताः इत्यर्थः ।

दिल्लीप्रभुः सोऽपि निशम्य वार्तां
विधातुकामः शमनं स्वशत्रोः ।
सुकोपनः प्रैषयदात्मसैन्यं
असंख्यविक्रांतभटैः समृद्धम् ॥ १७ ॥

सर्वाभिसारेण तदीयसेना
कृष्णानदीरोधसि मेघमाला ।
अभ्याययौ सौरकरानिवोग्रा-
न्कर्णाटयोधानभिषेणनाय ॥ १८ ॥

सेनाद्वयावस्थितसांयुगीना
अन्योऽन्यतीक्ष्णायुधताडनेन ।
स्वपक्षसंरूढमहाभिमाना
स्तदा वितेनुस्तुमुलं सुभीष्मम् ॥ १९ ॥

---

१८) **सर्वाभिसारेण** = समस्तसैन्येन " सर्वाभिसारः सर्वौघः सर्व-सन्नहनात्मकः " इत्यमरः ।
अभिषेणनाय = आक्रमणाय " यत्सेनयाभिगमनमरौ तदभिषेणनम् " इत्यमरः ।

१९) **सांयुगीनाः**= रणकुशलाः "सांयुगीनो रणे साधुः" इत्यमरः ।
तुमुलं = सामूहिकयुद्धम् "तुमुलं रणसंकुले " इत्यमरः ।

पराजिता बुक्कनृपालयोधै-
स्तैर्जित्वरैर्विश्रुतबाहुसारैः ।
हित्वा जयाज्ञां परिपंथिनस्ते
प्राणाशया स्वां नगरीमगच्छन् ॥ २० ॥

सेनामेवं यवनजयिनीं जैत्रयात्रानिवृत्ताम्
भेरीढक्कापटहनिनदैर्भेदयंतीं श्रवांसि ।
विद्यारण्यः सह नृपतिना वीक्ष्य मोमुद्यमानो
वीरान्सर्वानुचितविधिना तोषयामास भूयः ॥ २१ ॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां जैत्रयात्रावर्णनं नाम द्वादशस्तरङ्गः ॥

॥ अथ त्रयोदशस्तरङ्गः ॥

तदा यतींद्रः परिशील्य चित्ते
स्वल्पावकाशां नगरीं ततोऽन्यां ।
कर्णाटचक्रेश्वरराजधानीं
निर्मातुमैच्छत्सुमहाविशालाम् ॥ १ ॥

स तुंगद्रभातटिनीतटांते
महामहीध्रैः परितः सुगुप्ते ।
अव्यायते माल्यवतो विदूरे
संस्थापयामास पुरीं प्रदेशे ॥ २ ॥

स कारयामास गिरींद्रकल्पा-
न्परैरभेद्यान्नवतुंगसालान् ।
प्रकल्पयामास जलप्रपूर्णा
महागभीराः परिखाः समंतात् ॥ ३ ॥

रराज शाखानगरैः पुरी सा
सुतुंगहर्म्यैरपि शुभ्रकुड्यैः ।

---

३) परिखाः = परितः खेयानि " खेयं तु परिखा धारस्त्वं-
भसां यत्र धारणम् इत्यमरः ।

महाविशालैरपि राजमार्गैः
　　प्रशस्तशृंगाटकमंडलैश्च　　　　　　　　　　　॥ ४ ॥

प्रतोलिकाभिर्विपणिव्रजैश्च
　　महाचतुःशालपरंपराभिः ।
महोच्चदेवायतनैश्च चैत्यै-
　　रावेशनैर्नर्तनमंदिरैश्च　　　　　　　　　　　॥ ५ ॥

---

४) **शृंगाटकमण्डलैः** = चतुष्पथसमुहैः " शृङ्गाटकचतुष्पथे " इत्यमरः ।

५) **प्रतोलिकाभिः** = नगराभ्यन्तरमार्गैः " प्रतोली विशिखा रथ्या " इतिहलायुधः ।

विपणिव्रजैः = क्रय्यवस्तुशालापंक्तिभिः " विपणिः पण्यवीथिका " इत्यमरः ।

चतुःशालं = अन्योन्याभिमुखशालाचतुष्कं " संजवनं त्विदं चतुःशाल"मित्यमरः ।

चैत्यैः= यज्ञायतन भेदैः " चैत्यमायतनं तुल्ये " इत्यमरः ।

आवेशनैः=शिल्पशालाभिः "आवेशनं शिल्पशाला" इत्यमरः।

विप्रालयैर्बाहुजवेश्मसंघै-
  र्भूमिस्पृशां गेहकदंबकैश्च ।
शूद्रालयैः कारुकुलादगेहैः
  कुलालजाबालनिवेशजालैः ॥ ६ ॥

नृपालयैर्मंत्रिनिकेतनौघै-
  स्तथैव सेनापतिमंदिरैश्च ।
कायस्थयोधाधिकृतां निवासै
  र्विद्वत्प्रकांडालयपंक्तिभिश्च ॥ ७ ॥

प्रासादमेकं नृपवासयोग्यं
  निर्मापयामास यतिप्रकांडः ।
स वैजयंतप्रतिमं महांतं
  विशुद्धचन्द्रोपलसौधरम्यम् ॥ ८ ॥

---

६) **भूमिस्पृशां** = वैश्यानाम् " वैश्या भूमिस्पृशो विशः" इत्यमरः
कारुः = शिल्पी । **कलादः** = रुक्मकारकः " कलादो रुक्मकारकः " इत्यमरः ।
कुलालः = कुंभकारः "कुंभकारकः कुलालस्स्यात् " इत्यमरः ।
जाबालः = अजपालकः "जाबालःस्यादजाजीवीन्यमरः ।
कायस्थः = लिपिकारः (Clerk)
८) **वैजयन्तः** = महेन्द्रप्रासादः " स्यात्प्रासादो वैजयन्त इत्यमरः

निर्माप्य चैवं नगरीं यतीन्द्र-
श्चकार विद्यानगरीति नाम ।
अद्यापि जागर्ति शिलालिपिर्या
प्रवक्ति विद्यानगरप्रतिष्ठाम् ॥ ९ ॥

नागेष्वर्के नियमितशके शालिवाहस्य याते ।
धातुश्चाब्दे सुगुणसहिते मासि वैशाखनाम्नि ॥
शुक्ले पक्षे सुरगुरुयुते सौम्यवारे सुलग्ने ।
सप्तम्यां श्रीविजयनगरं निर्ममे निर्ममेंद्रः ॥ १० ॥

॥इति श्रीविद्यारण्यकथातरङ्गिण्यां विजयनगरनिर्मितिर्नाम त्रयोदशस्तरङ्गः॥

---

१०) **शालिवान शकाद्धाः** = 1258 क्रि. श. 1336 धातृ संवत्सरस्य वैशाखमासे शुक्लपक्षे सप्तम्यां बुधवासरे लग्नस्थे गुरौ विजयनगरं निर्मितमिति शासनार्थः ।

(॥)
()

॥ अथ चतुर्दशस्तरङ्गः ॥

कर्णाटकक्ष्मापतिराजधानीं
निर्माप्य विद्यानगरीं मुनीशः ।
नानाजनाकीर्णमहापथां तां
शुभे दिने तत्र निनाय भूपम् ॥ १ ॥

अखण्डकर्णाटकभूमिभागे
पट्टाभिषिक्तं नृपतिं विधातुं ।
सामंतभूपान्विदुषश्च सर्वा-
नाकारयामास स दूतवृन्दैः ॥ २ ॥

ततो मुहुर्ते शुभलक्ष्मयुक्ते
सुतारकोपेतसुमंगलेऽह्नि ।
विवेश राज्ञा सह दिव्यशोभं
महार्घरत्नोज्ज्वलमंडपं सः ॥ ३ ॥

नरेन्द्रसाहस्रसुमंडितायां
विद्वज्जनाकीर्णमहासभायाम् ।
आरोपयामास नृपात्मजं तं
सिंहासनं हाटकनिर्मितं सः ॥ ४ ॥

---

४) हाटकनिर्मितं =सुवर्णरचितम् "स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटक"मित्यमरः ।

चतुःसमुद्राहृतशुद्धतोयै-
महानदीदिव्यजलैश्च विप्राः ।
सम्राजमेनं नृपचक्रमध्ये ।
तमभ्यर्षिंचन्विधिवत्तदानीम् ॥ ५ ॥

उपायनीचक्रुरतीव तुष्टा
महान्ति रत्नानि तदावनीशाः ।
तमस्तुवन्बंदिजनाः प्रगल्भाः
कर्णाटभूमंडलसार्वभौमम् ॥ ६ ॥

जनाश्च कर्णाटकदेशभाजः
प्रपेदिरे मोदभरं महान्तं ।
सर्वे तदानीं ननृतुः प्रकामं
मयूरसंघा इव वृष्टिकाले ॥ ७ ॥

नियोजयामास स बुक्कदेवं
तं यौवराज्येऽप्रतिमप्रतापम् ।
उवाह साचिव्यभरं च वेत्ता
स सायणो योगिवराज्ञयैव ॥ ८ ॥

इत्थं व्यवस्थां प्रविधाय योगी
गुरोर्निदेशं च कृतं विभाव्य ।
दीर्घं विनिःश्वस्य प्रहृष्टचेता
आनन्दबाष्पं मुमुचे कृतार्थः ॥ ९ ॥

ततो यतीनां प्रवरो महीपो
गुरुं समारोप्य सुवर्णपीठम् ।
प्रक्षाल्य पादौ विनतोत्तमांगः
प्रपूजयामास सहानुजोऽसौ ॥ १० ॥

अनुग्रहात्ते भगवन्कृतार्थः
स्वप्नेऽप्यचिंत्यं पदमेतदाप्तम् ।
त्वदीयमेतत्सकलं हि राज्यं
त्वत्किंकरा एव वयं सदैव ॥ ११ ॥

इत्थं निवेद्याथ गुरोः पुरस्ता-
द्राजन्यचक्रार्चितपादपद्मः ।
धनानि रत्नान्यपि कोटिशः सः
भक्त्योपदीकृत्य ननाम मूर्ध्ना ॥ १२ ॥

---

१२) राजन्यः = नृपः " मूर्धाभिषिक्तो राजन्यः " इत्यमरः ।

वत्सास्मि तुष्टस्तव वाग्भिराभिः
किं वा विरक्तस्य धनेन कृत्यम् ।
एतानि सर्वाण्यपि पंडितेभ्यो
विश्राणयस्वेत्यवदद्यतीन्द्रः ॥ १३ ॥

लघूकृते भूमिभरे नितांतं
स राजतंत्राणि विहाय शांतः ।
प्रयुज्य चाशीर्विनताय राज्ञे
सुपावनं शृंगगिरिं प्रतस्थे ॥ १४ ॥

तत्र ज्ञाननिधिर्वसन्यतिवरो वेदत्रयस्यापि सः ।
कृत्वा भाष्यमनुत्तमं स्मृतिमपि व्याख्याय पाराशरीं ॥
अन्यान्दर्शनसंग्रहादिविविधप्रौढप्रमेयांचितान् ।
तन्वन्लोकहिताय सत्कृतिचयान्कीर्तिं स्थिरां प्राप्तवान् ॥१५॥
विद्यातीर्थमहायतींद्रचरणालोकाभिलाषांचितः
सम्राट्सानुगमण्डलो हरिहरः शृङ्गाद्रिमध्याययौ ।
तन्मौनींद्रपदार्चनाच्च सुकृती तत्पाणिजातं गुरुं
संसेव्याथ सुभारतीत्युपपदं श्रीकृष्णतीर्थं ययौ ॥१६॥

---

१३) विश्राणयस्व = प्रयच्छ ।
१५) सत्कृतिचयान् = उत्तमोत्तम ग्रन्थान्
१६) पंचाननः = सिंहश्रेष्ठ इत्यर्थः
शांताजानिः = शांता जाया यस्य सा ऋष्यशृङ्गमुनिः
अन्तेवसत्संकुलं = शिष्यसमूहम् ।

विद्यातीर्थे भुवनविदिते योगसिद्धिं प्रपन्ने
तन्नामानुस्मरणमहितं भारतीकृष्णतीर्थः ।
निर्मातुं यः कृतमतिरभूच्छंकरागारमग्र्यम्
विद्यारण्योऽतिमुदितमनास्तस्य साह्यं चकार ॥१७॥

कर्णाटक्षितिमानसाब्जतरणिर्योगीन्द्रपंचाननः ।
शांताजानितपोवने मुनिजनोपास्ये प्रशांते वसन् ॥
ब्रह्मज्ञानमुपादिशन्नगणितानंते वसत्संकुलं ।
तस्मिन्ब्रह्मणि सच्चिदात्मनि रतस्सानंदमासीच्चिरम् ॥१८॥

॥ इति श्रीविद्यारण्यकथातरङ्गिण्यां हक्कदेवपट्टाभिषेकवर्णनं नाम चतुर्दशस्तरङ्गः ॥

॥ समाप्तश्चायं ग्रंथः ॥

श्रीशिवार्पणमस्तु-श्रीगुरुचरणारविंदार्पणमस्तु

ॐ शांतिः शांतिः शांतिः ।

शुद्धाशुद्धपत्रिका

कथासारे विज्ञप्तौ च ।

पृष्ठसंख्या	पङ्क्तिः	अशुद्धरूपम्	शुद्धरूपम्
3	13	मुद्रापन	मुद्रापण
2	19	नामृतानुसारेण	नामृतासारेण
3	17	संजींविनि	संजीविनी
6	3	पूरयामिति	पूरयामीति
6	18	संचार्य	संचर्य
7	4	लुण्ढित	लुण्ठित
7	8	महामुनीं	महामुनिं

काव्ये

पृष्ठसंख्या	श्लोकसंख्या	अशुद्धरूपम्	शुद्धरूपम्
६	१	संजनाढ्यः	सज्जनाढ्यः
७	८	शुभं यूनति	शुभंयूनति
१०	३	लक्ष्मी सुविशाल	लक्ष्मीसुविशाल
११	५	कृतसनि धानः	कृतसन्निधानः
१२	९	समस्ततन्त्रः	समस्ततन्त्र-मन्त्र
१५	१९	बंधुजनैरसमेतः	बंधुजनैस्समेतः
१६	३	सवाश्च	सर्वांश्च

पृष्ठसंख्या	श्लोकसंख्या	अशुद्धरूपम्	शुद्धरूपम्
१८	११	वियोगभीतिं	वियोगभीतिः
३२	२९	हृदान्तः	ह्रदान्तः
३५	४०	सत्व रस	सत्वरस
३७	२	लोचन दीर्घ	लोचनदीर्घ
३९	७	शंकराचार	शंकराचार्य
३९	८	समावेष्टैय	समावेष्ट्य
३९	११	मठो पि	मठोऽपि
४३	४	वायत भीम	वायतभीम
४४	५	प्रवृत्तः	प्रवृत्ताः
४४	६	वसु	वसु
४५	८	भात्तवेगाः	मात्तवेगाः
४५	११	विचुक्रशु	विचुक्रुशु
४५	११	क्रुद्धाद्ट	क्रुद्धोऽट्ट
५३	३९	दिनेशः	जनेशः
६२	७	तमेतमर्ध	तमेतमर्थ
६८	१४	घंटा,महता रवेण	घंटासुमहारवेण
७६	१३	प्रासादिहेतुज्ज्वल	प्रासादिहेत्युज्ज्वल
७७	१७	वार्ता	वार्तां
७८	२०	जयाज्ञां	जयाशां
७९	२	अव्यायते	अत्यायते

Printed at Sudha Mudrana Mandiram
Uttaradi Mutt Compound, Basavangudi,
BANGALORE - 560004